Baudhayana_
Śrautasutram

PK
3255
B3
1907
v.3
pt.4

JOHNS HOPKINS UNIVERSITY LIBRARY

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1445.

बौधायन श्रौतसूत्रम् ।

BAUDHĀYANA ŚRAUTA SŪTRAM

A SANSKRIT WORK ON THE VEDIC LITERATURE.

EDITED BY
DR. W. CALAND,
UTRECHT.

VOL. III. FASCICULUS IV.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET.
1921.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 1, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

The Society's Agents—

MESSRS LUZAC & Co., 46, *Great Russell Street, London, W.C.*

M. PAUL GEUTHNER, 13, *Rue Jacob, Paris, VIe.*

Complete copies of those works marked with an asterisk * cannot be supplied as some of the Fasciculi are out of stock.

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	As.
Açvavaidyaka, Fasc. 1–5 @ -/10/- each	3	2
Advaitachintā Kaustubha, Fasc. 1–4 @ -/10/- each	2	8
*Agni Purana (Text), Fasc. 4–14 @ -/10/- each	6	14
*Aitareya Aranyaka of Rig-Veda (Text), 2–4 @ -/10/- each.. ..	1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–5, Vol. IV, Fasc. 1–8 @ -/10/- each	14	6
Aitareyalocana	2	0
Amarakosha, Fasc. 1–2	4	0
*Anu Bhasyam (Text), Fasc. 2–5 @ -/10/- each	2	8
Anumana Didhiti Prasarini, Fasc. 1–3 @ -/10/- each	1	14
*Aphorisms of Sandilya (English), Fasc. 1 @ 1/-	1	0
Aṣtasāhasrikā Prajñāpāramitā, Fasc. 1–6 @ -/10/- each	3	12
*Atharvana Upanishads (Text), Fasc. 2–5 @ -/10/- each	2	8
Ātmatattvaviveka, Fasc. 1–3	1	14
Avadāna Kalpalatā (Sans. and Tibetan), Vol. I, Fasc. 1–13; Vol. II, Fasc. 1–11 @ 1/- each	24	0
Bālam Bhattī, Vol. I, Fasc. 1–2; Vol. II, Fasc. 1 @ -/10/- each ..	1	14
Bauddhastotrasangraha	2	0
Baudhāyana Śrauta Sūtra, Fasc. 1–3; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–4 @ -/10/- each	7	8
*Bhamati (Text), Fasc. 5–8 @ -/10/- each	2	8
Bhasavritty	0	10
Bhātta Dīpikā, Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–2 @ -/10/- each ..	5	0
Bodhicaryāvatāra of Çāntideva, Fasc. 1–7 @ -/10/- each	4	6
Brahma Sutras (English), Fasc. 1 @ 1/-	1	0
Bṛihaddevatā, Fasc. 1–4 @ -/10/- each	1	8
Bṛihaddharma Purāṇa, Fasc. 1–6 @ -/10/- each..	3	12
Çatadūṣaṇī, Fasc. 1–2 @ -/10/- each	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1–4 @ 2/- each ..	8	0
*Çatapatha Brāhmaṇa, Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–7; Vol. V, Fasc. 1–4 @ -/10/- each ..	14	6
Ditto Vol. VI, Fasc. 1–3 @ 1/4/- each	3	12
Ditto Vol. VII, Fasc. 1–5 @ -/10/-	3	2
Ditto Vol. IX, Fasc. 1–2	1	4
Çatasahasrikā-prajñāpāramitā, Part I, Fasc. 1–18, Part II, Fasc. 1 @ -/10/- each	11	14
*Caturvarga Chintāmani, Vol. II, Fasc. 4–25; Vol. III, Part I, Fasc. 1–18, Part II, Fasc. 1–10; Vol. IV, Fasc. 1–6 @ -/10/- each	35	0
Ditto Vol. IV, Fasc. 7 @ 1/4/- each	1	4
Ditto Vol. IV, Fasc. 8–10 @ -/10/-	1	14
Çlokavartika (English), Fasc. 1–7 @ 1/4/- each..	8	12
*Çrauta Sutra of Apastamba (Text), Fasc. 6–17 @ -/10/- each ..	7	8
*Çrauta Sutra of Çānkhāyana, Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4; Vol. III, Fasc. 1-4; Vol IV. Fasc. 1 @ -/10/- each	10	0
Cri Bhashyam (Text), Fasc. 1–3 @ -/10/- each	1	14
Cri Cantinatha Charita, Fasc. 1–4	2	8
Dāna Kriyā Kaumudī, Fasc. 1-2 @ -/10/- each..	1	4

कृतानि पिष्टानि समुप्य[1] संयुत्य[1] व्यभिमृश्य[1] पिण्डौ[1] कृत्वा-
ग्रेण[1] मारुतस्य पिण्डं पर्याहृत्याहवनीये वैश्वानरमधिश्रृञ्ज्या-
त्प्रदक्षिणमावृत्य[2] गार्हपत्ये मारुतं त्वचं ग्राहयित्वेमं त्वचं
ग्राहयेदमुं पर्यग्नि कृत्वेमं पर्यग्नि कुर्यादमुꣳ श्रपयित्वेमꣳ श्रप-
येदपि वोभयमेवोभयत्र कुर्यात्तस्य शृतस्यासादनं दक्षिणं[3]
परिधिसंधिमपरं[4] विमुच्य दक्षिणं वा परिधिमग्रेण । सिद्ध-
5. 11. मत ऊर्ध्वमेतस्मिन्वा एतौ मृजाते यो विद्विषाणयोरन्नम-
6. 22. त्तीतौतरमितरेणेत्येवैष[5] उक्तो भवति । यं मृधो ऽभि प्रवे-
पेरन्वाष्ट्राणि वाभि समियुरिति । प्रतिवेश्या राजानो मृधः ।
7. 15. स्व एव जनपदा[6] राष्ट्राणि विश्यो । यो हतमनाः स्वयंपाप
इव स्यादिति । सति बले हतमनाः स्वयंपाप इव स्यादिति ।
7. 21. साधुरूपे कुले स्वयंपापो । यस्मै प्रत्तमिव सन्न प्रदीयेतेति ।

---

१ Thus Be M; संयुत्यव्यूह्याभिमृश्य U G, समुप्यसंयुत्यपिंडौ व्यकृत्वाग्रेण Ben, संयुक्तव्यूह्याभिमृश्य H.

२ Thus (अधिश्रृंज्यात्) Ben, अधिश्रयात् M, अधिव्रज्यात् G H U, अधि-प्रश्न्यात् Be, cp. XXVI. 6 : 279. 9 : अधिश्रृञ्जन; it is synonymous to अधिश्रयात् ।

३ Om. Ben.

४ Thus all the MSS. exc. M, which has परिधिसंधिमन्वितरं; is अपरं to be cancelled? A prayoga omits it.

५ Thus G (sec. m.), °न्नमत्तीतरमितरेणेत्येष U, °न्नमत्तीतिरमितरेणेत्येष Ben, °न्नमत्तीतरिमितौतरंमितौतरेणेत्येवैष M,° न्नमत्तितरमितौतरेणेत्येष एवैष Be, °मितरेणेत्येष H (partly defective).

६ वा ins. G.

PK
3255
B3
1907
v.3

II. 128. 17. प्रत्तमनुपाकृतं[1] प्रतिबध्यमानमेवैतद्भवत्यथास्यामध्वरकल्पाया-
मिडान्तं[2] प्रथमं तन्त्रं कुर्यादेवं द्वितीयं । तृतीयेन सहावशेषं
वर्तयेत्कथमत्र भक्षा इति । तत्रतत्र वा भक्षयेदपि वा
II. 130. 4. सर्वासाᳪं समवदाय कृत्वान्ततो[3] भक्षयेदनड्वान्होत्रा देय इति ।
II. 130. 7. यजमानस्यैवैष गोष्ठाद्दातव्यो भवति । वेदिं परिगृह्यार्धमुद्ध-
II. 131. 6. न्यादर्धं नेति । दक्षिणं वा वेदेरर्धमपरं वेत्यैन्द्रस्यावदाय
वैश्वदेवस्यावद्येदथैन्द्रस्योपरिष्टादिति । द्वे एवैते अवदाने उक्ते
II. 131. 9. भवत । उपाधाय्यपूर्वयं[4] वासो दक्षिणेति । प्रवेणतो[5]
वान्ततो वा ताम्राणि वा नीलानि वा सूत्राण्युपहितानि[6]
II. 131. 13. भवन्त्यपि वोपधानरज्जुरेवैषोक्ता भवत्यथास्याᳪं संज्ञानेष्याᳪं[7]
सकृदेवानुवाचयेत्सकृदाश्रावयेद्द्वे ह्यस्यै याज्यानुवाक्ये भवतः ।
॥ ५ ॥

---

१ Thus Be; °मनापकृतं M G (pr. m.), °मनापापकृतं Ben H U, °मनापाकृतं G (pr. m.); °मनापाकृतमप्रति °G (sec. m.).

२ Thus (प्रतिबध्यमान°) M G U, प्रतिबध्य° the other MSS. (G, अप्रतिब° sec. m.).

३ Thus Ben, कृत्वाततो G U M, कृत्वातितो H.

४ Thus (cp. XIII. 20 : 131. 5) M only, उपधाय्य° the other MSS. and the Viv.

५ Thus M Be, प्रतिवेणतो Ben. प्रवतो H, प्रणवतो G U, प्रणतः the Viv. (both copies).

६ Thus Ben M Be °हतानि G H U.

७ Thus Ben Be U G, संज्ञान्येष्यां M H; the correct reading seems to be (see XXIV. 3 : 187. 7) संज्ञानीष्यां ।

II. 132. 16. अथ वै भवति यदि नावगच्छेदिममहमादित्येभ्यो[1] भागं
निर्वपाम्यामुष्मादमुष्यै विशो ऽवगन्तोरिति निर्वपेदिति निरु-
प्योपरमति[2] । परिदानान्तं कर्म कृत्वाथैतांस्त्रीहीन्कृष्णाजिने
समुप्योत्तरार्धे ऽग्न्यगारस्यासञ्जये।द्यथावगते सꣳसादये।त्प्रोक्षण-
II. 133. 15. प्रभृतिना कर्मणा प्रतिपद्येत । सिद्धमत ऊर्ध्वं । यथा नख-
निर्भिन्नायामेवꣳ शतकृष्णलायां । पुरा वा तण्डुलानामावप-
नाद्रुक्ममवदध्याच्छृतमुत्तरमपि[3] वैनꣳ शृतमेव सुवर्णरजताभ्याꣳ
II. 136. 9. रुक्माभ्यां परिगृह्यान्तर्वेद्यासादयेदा।ग्नेयस्य च सौम्यस्य चैन्द्रे
समाश्लेषयेदिति । व्यभिमृष्टानां पिण्डानां पुराधिवृञ्जना-
II. 138. 12. त्समाश्लेषयितव्यं[4] भवति । सर्वेषामभिगमयन्नवद्यतीति[5] सदे-
II. 140. 17. वतस्य[5] सस्विष्टकृत्कस्येत्येवेदमुक्तं[6] भवत्य।थो खलु यावतीः समा
एष्यन्मन्येत तावन्मानꣳ स्यादिति । त्रिꣳशद्वर्षस्त्वेत्स्यात्सप्ततिमानं
कुर्वीत । चत्वारिꣳशद्वर्षस्त्वेत्स्यात्षष्टिमानं कुर्वीतै।ष एवैतस्याभि-

---

१ इदम् instead of इमम् Be Ben H M.

२ Probably इति has fallen out.

३ अपदध्यात् Ben M, उपदध्यात् Be G U H.

४ Thus (°धिवृंजनात्) M G (sec. m.), °धिव्रजनात् U H G (pr. m.), °धिंजनात् Be; Ben is defective; cp. अधिवृञ्ज्यात् XXVI. 5: 277. 2. Bhavasvāmin gives the periphrase: प्रागधिश्रयणात् ।

५ Thus U G Ben; °तीतिसदैवस्य M, °तीतिसदैवतस्य H, °तितीडे-दैवतस्य Be.

६ Thus M only; सस्विष्टकृस्ये° Be, सस्विष्टकृतस्ये° or स्विष्टकृतस्ये° the other MSS.

II. 142. 12. वृद्धिकल्पो[1] ' ऽथ वारुणेषु च संज्ञानेष्ट्यां[2] च सकृदेवानुवाच-
II. 142. 16. येत्सकृदाश्रावयेत्सकृत्प्रदानाः समानदेवता ' आपोनप्त्रीयं चरुं
पुनरेत्य निर्वपेदिति ' को नु खल्वपां नपाद्भवतीति ' वैद्युत
II. 145. 12. इत्येव ब्रूयात्'क्ष्णमधु चेति ' पौत्तिकमित्येवेदमुक्तं[3] भवत्य'न-
स्निग्धमिति ' त्रिवल्मीकमित्येवेदमुक्तं[4] भवत्य'थाप्युदाहरन्ति
II. 149. 13. त्रिच्छदिष्कमित्येवेदमुक्तं[5] भवति ' यथा त्रिधातावेवꣳ[6]
संदिग्धपुरोडाशस्यावदानकल्पः ' ॥ ६ ॥ चतुर्थः ॥
II. 152. 2. स सर्पानसृजतेति ' मासा एवैत[7] उक्ता भवन्ति ' स
II. 155. 10. वयाꣳस्यसृजतेति ' छन्दाꣳस्येवैतान्युक्तानि भवन्ति ' स वैव
II. 155. 13. स्यादिति ' पुराणगार्हपत्यमभ्युपदिशन्ति ' तस्य पशुवेलाया-
मुल्मुकमादाय दक्षिणया द्वारोपनिर्हृत्य दक्षिणेन सदः परीत्य
दक्षिणेन मार्जालीयं धिष्णियं पर्याहृत्यान्तरेण यूपं चाहव-
नीयं चोपातिहृत्यान्तरेण चात्वालोत्करावुदङ्ङुपनिर्हृत्य तेन
पशुꣳ अपयेयुर'थ यदाहवनीयादुल्मुकꣳ स्यादपया तत्सहा-

---

१ एतस्य om. M ; Ben Be are defective here.

२ संज्ञान्येष्ट्यां again M G U H, see above.

३ पौतिक° M Ben, वौत्तिकं the Viv. (one copy), पौतीक° G U, पौचीक H Be and another copy of the Viv.

४ °वल्मीक° Ben H, °वल्मिक° Be M G U.

५ Thus Ben ; त्रिवृद्दीत्ये° M, त्रिवृद्दित्ये° Be, त्रिविवृतीत्ये° H G U.

६ त्रैधातावेवं Be, त्रिधातवेवं M, त्रि (or त्रे° त्रै°) धातवीयैवं the other MSS.

७ Thus M only, एवैता all the other MSS.

ह्वरेयुः । किंदेवत्यानि खल्वपाय्यानि भवन्तीति । द्वे प्राजा-
II. 156. 14. पत्ये आग्नेयं वायव्यं वैश्वदेवमितीष्टर्गो वा अध्वर्युर्यजमान-
स्विष्टर्गं इत्युष्णायमित्येवेदमुक्तं[1] भवत्यथाप्युदाहरन्त्यध्वर्युरेवैष
उक्तो भवत्यासन्यान्मा मन्त्रात्पाहि कस्याश्चिदभिशस्त्या इत्यनु-
व्याहारो ह[2] वा आसन्यो मन्त्रस्तस्मान्मा पाहीत्येवेदमुक्तं
II. 160. 14. भवति । तस्माद्यज्ञवास्तु नाभ्यवेत्यमित्यहोरात्राविस्येकं । याव-
दग्नयः शीताः[3] स्युरित्येतदेकं । यावदेनमभिवर्षेदित्येतदपरं ।
II. 163. 9. द्वौ समुद्रौ विततावजूर्याविस्यहोरात्रावेवैतावुक्तौ भवतः ।
पर्यावर्तेते जठरेव पादा इत्युदरे पादा इत्येवेदमुक्तं भवति ।
तयोः पश्यन्तो अतियन्त्यन्यमपश्यन्तः सेतुनातियन्त्यन्यमित्यहः
पश्यन्तो अतियन्ति रात्रिं स्वप्नेन सेतुनातियन्त्यन्यमिति ।
II. 163. 19. द्वे द्रधसी सततौ वस्त एक इत्यादित्यो ऽहोरात्रे वस्त इत्ये-
वेदमुक्तं भवति । तिरोधायैत्यसितं वसानः शुक्रमादत्ते अनु-
हाय जार्या इति । रात्रिं वसानस्तिरोधायैति शुक्रमादत्ते
II. 167. 8. ऽहरित्येवेदमुक्तं[4] भवति । कीटावपन्नस्येति । कतमो नु
II. 167. 10. खल्वयं कीटो भवति[5] । य एवैष पिण्डान्संवर्तयतीति । नित्ये

---

१ Thus (उष्णायम्) M G U H and the Viv. (periphrase: दर्वीं वा उलुकं वा); उष्णय° Be, उ–य° Ben.

२ Only given by M Be.

३ All the MSS. om. the visarga and Be reads शिता ।

४ ऽहरि° MSS.

५ इति ins. M G U

ग्रहणे वैष्णवीमृचमनुवर्तयतीति । पृषदाज्य एवैषानुवर्तयि-
तव्या[1] भवति[2] । ॥ ७ ॥

II. 171. 8. अथातो ऽतिग्राह्यान्व्याख्यास्याम । इमे न्वेव[3] पृष्ठ्याति-
ग्राह्याः पञ्चैन्द्रा वाजपेये । परःसामानश्चार्वाक्सामानश्च सौर्यो
वैषुवते । वैश्वकर्मणादित्यौ गवामयने । प्राजापत्यौ महाव्रते ।
बार्हस्पत्यो बृहस्पतिसवे । वैमृधे चोद्भिदि च त्विषिमति च
वृषा सो अंशुः पवत इति च । द्वावश्वमेधे महिमानावा-
देशादेवाश्वस्य वपां महिमाभ्यां[4] परिजुहुयात् । कथमु खलु
परःसाम्नां भक्षो भवतीति । रुद्रवद्गणस्य सोम देव ते मति-
विदो माध्यंदिनस्य सवनस्य त्रिष्टुप्छन्दसो[5] ऽद्भिरोषधीभिः
पीतस्यौषधीभिः प्रजाभिः पीतस्य प्रजाभिः प्रजापतिना
पीतस्य मधुमत उपहूतस्योपहूतो[5] भक्षयामीत्येष एवार्वाक्सा-
II. 177. 18. म्नामावृत्तो भक्षो । ऽष्टाप्रूड्ढिरण्यं दक्षिणेत्यष्टापिल्लकमित्येवेद-
मुक्तं[6] भवति । द्वौ चेद्गर्भौ स्यातां द्वादशप्रूट् स्यादेको ह

---

१ Thus M; नुवर्ति(र्ती)तव्या Be G H, °नुवर्तयितव्यं U, नुवर्तव्या Ben.

२ इति ins. M G U.

३ त्वेव MSS.; the Viv. points to न्वेव ।

४ Thus (with °मा°) all (only महीभ्यां Ben), also the Vivaraṇa.

५ ...५ Thus acc. to the Viv. and cp. Āp. XXI. 21. 4. The MSS. more or less corrupt.

६ Thus Be G U; °ष्टाफल्लक° M; °ष्टाप्रूत्यिपिल्लक° H; Ben altogether corrupt. Is पिल्लक = पिण्डक ? or are we to read पुलाक ? The same word occurs VII. 6 : 209. 18.

महाकोशः स्याद्वाववान्तरकोशौ स्यातामथास्थिगर्भाया[1] आज्येनैवैतान्यस्थानि[2] समुदायुत्य मध्यमेन पर्णेनान्तःपरिधि निनयेद्भूर्भुवः सुवरिति । ॥ ८ ॥ पञ्चमः ॥

II. 180. 5. यदालब्धायामश्वो भवतीत्यालब्धायां चेदश्वः स्यात्सꣳस्थापयेदेवाथ चेदुपाकृतायामश्वः स्यादन्यमेतस्मिन्स्थान उपाकृत्यो-
II. 180. 12. sqq. त्तरमश्वमेधसंपन्नमेतयागमयेरन्नित्यथैते[3] जया अभ्यातानाः[4] राष्ट्रभृत[4] इत्याहिताग्नेश्चानाहिताग्नेश्चान्यत्र विहाराद्दृष्टा भवन्त्यभिसमारभ्यात्त्वेवैनानाचार्याः[5] प्राक् स्विष्टकृत उपजुह्वत्यष्टौ वसव इति । कतमे नु[6] खल्विमे वसवो भवन्तीति । पृथिव्यन्तरिक्षं द्यौरग्निर्वायुरादित्यश्चन्द्रमा आप इत्येते ऽष्टौ वसव । एतेषु वा इदꣳ सर्वं प्रतिष्ठितं यदिदं किंच । य एवं वेद प्रत्येव तिष्ठत्येकादश रुद्रा इति । प्राणा एवैत[7] उक्ता भवन्ति । द्वादशादित्या इति । मासा एवैत[7] उक्ता भवन्ति । पञ्च गृह्यन्ते नवनव गृह्यन्ते पञ्चधा विगृह्यन्ते । नवनवाꣳशवो

---

१ Uncertain reading; °गर्भाया the Viv.; °गर्भयाजमाज्येना° Ben, गर्भयाममाज्ये° M, °गर्भमाज्येना° Be G U, गर्भामाज्येना° H.

२ °स्थानि G Be and the Viv., °स्थीनि M U Ben, °स्थिनि H.

३ Thus (°त्तरमश्वमेध°) M, °त्तरंमेध° or °त्तरमेध° the other MSS., but cp. the Vivaraṇa: उत्तरश्मिन्मेधवर्जिते ।

४ Thus M; जया अभ्यातानाराष्ट्र° Be G U, जयाभ्यातानाराष्ट्र° Ben H.

५ Thus, in accordance with the Viv., G; °पिसमारंभा° M Be, °भिसमारंभा° U Ben H.

६ Om. M.

७ Thus both times M and G (sec. m.); एवैता the other MSS.

भवन्त्यथ य एव दशमो मन्त्र एतेषामेवैषो ऽभिग्रहणार्थो[१]
II. 192. 10. दृष्टो भवति । तां दुग्ध्वा ब्राह्मणाय दद्याद्यस्यान्नं नाद्या-
II. 196. 2. दिति । भैक्षाय प्रत्यवस्थितायैवैषा दातव्या भवति । किंदे-
वत्या उ खल्वतिरिक्तसोमा[२] भवन्तीति । यंयं ग्रहमभ्यतिरि-
च्येरꣳस्तत्तद्देवत्या[३] एव स्युरित्येतदेकमथापरं । विज्ञायत उ
खल्वेषां[४] ब्राह्मणमथ कस्मादैन्द्रो यज्ञ आ सꣳस्थातोरित्येतस्मा-
II. 199. 5. दैन्द्रावैष्णवा एव भवन्ति । तेन शीतीभवता षडहसꣳस्थां
काङ्क्षेयुरिति । षडहब्राह्मणमेवैतद्भवत्यथ चेदहःसंयोग[५] एव-
मापद्येत[५] यथापि नव मध्यमानि सांवत्सरिकाण्यहानि संनि-
गच्छेयुस्तदानीमेवैनꣳ शीतीकृत्वा संचिनुयुरथ चेदुदयनीये
ऽतिरात्र[६] एतदेव[६] । प्रजा वै सत्त्रमासत तपस्तप्यमाना अजु-
ह्वतीरिति । तत्पृच्छन्ति[७] कतमत्तत्सत्त्रं[८] भवतीति । यदेवै-

---

१ Thus M and the Viv.; all the other MSS. स्य° instead of भि°

२ तिरिक्तः सोमो भवतीति M. Ben (the last without इति), °तिरिक्त-सोमा भवंतीति the other MSS.

३ °देवता MSS.

४ Thus G M U H; खल्विषां खल्वे Be, खल्वेब्राह्म Ben. The last reading seems to point to खल्वेकेषां ब्रा°, cp. the Viv.: अन्येषां ब्राह्मणम्; but the Brāhmaṇa here cited is to be found TS. III. 3. 7. 3.

५ Thus M and the Viv.; °संयोगं एवमा° G U, संयोगमेवमा M Be H.

६ Thus M; तिरात्रे एतदेव H U (sec. m.) तिरा एतदेव G U (pr. m.), तिरात्रीतदेव Ben, तिरात्रिएवतेव Be.

७ पृच्छंति M only (cp. XIV. 1 : 152. 5), इच्छति all the other MSS.

८ Thus corrected; कतमत्त° M Be U H, कतमत्तसत्रं Ben G (sec. m.).

तदनाहिताग्नयो वृथाश्रमꣳ आम्यन्त्येतत्सच[१] भवतीति ।
॥ ६ ॥ षष्ठः ॥

II. 204. 2. आश्विनं प्रागाश्विनमिति । कियन्नु खल्वाश्विनं भव-
II. 204. 10. तीति । [२]द्वियोजनं वा यावद्वाश्वो ऽह्ना गच्छेद्विस्तावा[३] वेदि-
र्भवतीत्याग्निकस्य प्रक्रमस्य चतुरश्रकृतस्याक्ष्णयामानमाददीत ।
स प्रक्रमः स्यात्तेन वेदिं विमिमीतापि वा विꣳशत्याश्च
रथाक्षाणामेकविꣳशत्याश्च पदानामष्टाङ्गुलस्य च[४] चतुर्विꣳशं
भागमाददीत । स प्रक्रमः स्यात्तेन वेदिं विमिमीते ।
त्रिस्तावो[५] ऽग्निर्भवतीति[५] । त्रयः सप्तविधाः । स एकविꣳशति-
II. 204. 5. विधो । ऽथैतौ ह्रदौ मध्यतो देवयजनस्य जोषयत इति ।
किमर्थौ[६] खल्विमौ ह्रदौ भवत इत्यश्वस्नावनो ह दक्षिण
II. 208. 18. आवभृथिक उत्तरो । द्वौ दासावनुजायै च पुत्रो ऽन्वाधेयायै
चेति । यो ऽस्य पितुरनुजायाः पुत्रः स पुरस्तान्नयत्यथ यो
II 208. 19. ऽस्य मातुरन्वाधेयायै पुत्रः सो[७] ऽपरो[७] । जरत्पूर्वया सव्यं
II. 209. 8. जानु वेष्टयित्वेत्युपधानरज्जुरेवैषोक्ता भवति । शतं वै[८] तस्या

---

१ Thus Ben H U G (pr. m.). श्राम्यंतेतत्स M श्राम्यंतेतत्स॰ Be G (sec. m).

२ कियन्नु खलु ins Be M, कथं नु खलु H.

३ स्तावाश्वो॰ M Be.

४ च given only by M and G (sec. m.), cp. XXX. 4 s.fin.

५ त्रिस्तावाश्वेदिर्भ॰ M Be, त्रिस्तावावेदिर्भ॰ H.

६ नु ins. Ben.

७ Thus G M Be ; सोऽपरो H U, सोपरो Ben.

८ Are we to supply वै also XV. 5 : 209. 8 or to accept that the Karmānta points directly to T Br. III. 8. 9. 3 ?

II. 209. 11. राजपुत्रा इति । प्रतिहिता एवैत उक्ता भवन्ति । शतष्[1]
II. 211. 5. राजान[1]उग्रा इति । राजन्या एवैते नाभिषेच्या[2] भवन्त्यथ
सावित्रमष्टाकपालं प्रातर्निर्वपतीत्येषैव[3] प्रथमा सावित्री ।
वैश्वदेवपरुषि द्वितीयापराह्णे तृतीयै तदत्रैकाहिकं कर्म
जानीयादुत्तरतस्य देवयजनादुदवस्येच्चातुर्मासिकानां पशूना-
II. 217. 18. मेवं[4] वायव्याय[5] पशव एवं तूपराय[6] । सप्ताहान्येतयेष्ट्वा यजत
इति । कथमत्र भक्षा इति । तत्रतत्र वा भक्षयेदपि वा पुर-
स्तादेवैतस्मै सप्ताहाय । यूपमाम्नाये[7] राज्जुदालमग्निष्ठं[7] मिनो-
तीति । श्लेष्मातक इत्येवेदमुक्तं भवत्यथाप्युदाहरन्ति राज्जु-
दालमग्निष्ठं मिनोति भ्रूणहत्याया अपहत्यै । पौतुद्रवावभितो
II. 223. 5. भवतः पुण्यस्य गन्धस्यावरुद्ध्या इति । तृतीयं दक्षिणानां ददा-
तीत्याग्निकानामु[8] ह[8] तृतीयं कामप्रेण सह तृतीयमतिरात्रे
II. 223. 14. तृतीयं । चतुष्टोम एव भवति[9] । चतुरुत्तरीय[10] एष[10] चतु-
ष्टोमो भवति । ॥ १० ॥

---

१ Read शतमराजान ?

२ Conjectural reading; नाभिस्रेया M, नाभिषिच्या the other MSS.

३ Thus G Ben; M om. एव, reading त्वेषा; °त्यैवैषैव U H, त्येवेषैव Be.

४ मेव M G U.

५ °व्याये Be H U.

६ इति ins. M.

७ Reading and interpunction dubious; °म्नायेराज्जु° M, °म्नायेतराज्जु° G, म्नायेत् राज्जु° the other MSS.

८ Thus G M Be; °कानामुदाहृतं U H, Ben defective.

९ इत्येके ins. M only.

१० °रीया एष G and the Viv.; °रीयादेष M Be, °रया (or °पा) देष Ben U H.

II. 225. 7. एकस्मै स्वाहा द्वाभ्याꣳ स्वाहेति । कथमु खल्वेताननु-
II. 226. 8. वाकाञ्जुहुयादिति । यथाप्रकृत्यस्तथानन्तरायꣳ[१] होतव्या।श्चतु-
र्विꣳशतिꣳ रशना आदाय यूपानभ्यायन्ति चतस्रश्चतस्र इतरे
परिकर्मिण इति[२] । कथमेतास्तु नियुञ्ज्यादित्य।श्वस्तूपरो
गोमृग इति ते त्रयः समानरशना । रराट्येषु तिस्रः । पर्य-
ङ्ग्येषु पञ्चाग्नये ऽनीकवते रोहिताञ्जिरनड्वानित्येतेष्वष्टौ[३] ।
सोमाय स्वराज्ञे ऽनोवाहावनड्वाहावित्येतेषु सप्ता।थैतेषां त्रय-
स्त्रयः समानरशना । मुख्यस्यैवैषां चतुर्थी भवति । समानं
कर्म पर्यग्निकरणात्।पर्यग्निकृतानामेतेषां पशूनामूनविꣳशति-
रुत्सृज्यन्त[४] एकचत्वारिꣳशतमतिशिष्यन्ते । द्विचत्वारिꣳशत-
मेषाꣳ[५] शासा[६] भवन्त्यश्वे ऽत्र[७] द्वौ समासं गच्छतो । ऽथैत-
रेषां प्रतिपशु[८] संपद्यन्त[९] इन्द्राग्निभ्यामोजोदाभ्यामुष्टाराविति ।
II. 235. 6. प्रासङ्ग्यावेवैतावुक्तौ[१०] भवतो । ऽथैतस्मिञ्छल्मलिशर्च[११]

---

१ •तथानंतराय MSS. (only G : •नंतरा see m. and M : •तथांतरायं)।

२ इति supplied by me.

३ •निमित्तेष्वष्टौ G U Be.

४ जन om. M, जना read Be U.

५ शतेषां instead of एषां G U H.

६ Thus M; शसा G Be, शाखा Ben U H.

७ Thus M Be G (sec. m.); •येन Ben, चन U H.

८ Thus Be G, •पशुꣳ or •पशुं the other MSS.

९ •पद्यते Ben H.

१० Thus G M Be; सप्रसंख्या• Ben, सप्रासंख्या• U H.

११ Thus (शल्मलिशर्चे चा•) M, •शच Be Ben H U, •वचाशुपि• G (sec. m.).

श्चाशुपिष्टानि[1] संयुत्येत्याशुकानामेवैतानि व्रीहीणां पिष्टानि
शल्मलिश्लेष्मणा संयुतानि[2] भवन्ति। पृथक् प्रतिप्रस्थातारो ऽव-
II. 240. 4 द्यन्ति। तेषां मैत्रावरुणा एवानुब्रूयुस्तूलार्यवैतानि प्रदानानि[3]
भवन्तील्लुवर्दाय स्वाहा बलिवर्दाय स्वाहेति। सूर्याचन्द्रमसा-
वेवैतावुक्तौ भवतो। ऽथाप्युदाहरन्ति संवत्सरो वा इल्लुवर्दः
II. 242. 5 परिवत्सरो बलिवर्द इति। तस्य मूर्ध्नि जुहोति[4] जुम्बकाय
स्वाहेति। किंदेवत्या उ खल्वियमाकृतिर्भवतीति। वारुणी-
II. 242. 10 त्येव ब्रूयात्किंकिदीविर्विदीगय इति। विदिदिहीविकीदी[5]ह
II. 243. 4 किकिदीविर्भवति। पृषत उ[6] पतंगो[6] विदीगयो[6]। ऽथैता-
न्यशूनुपाकरोत्याग्नेयमैन्द्राग्नमाश्विनमिति। यमा एवैते छागाः
समानयोनयो भवन्ति। तेषामुक्तं चरणं यथैकादशिनानां
II. 244. 2 पशूनां। किंदेवत्या उ खल्वृतुपशवो भवन्तीत्यृतुदेवता
इत्येतदेकमथापरमाग्नेयाः प्रथमा ऐन्द्रा द्वितीया वैश्वदेवा-
स्तृतीया मैत्रावरुणाश्चतुर्था बार्हस्पत्याः पञ्चमाः सावित्राः षष्ठाः
संवत्सराय निवचस इति प्राजापत्याः। ॥ ११ ॥ सप्तमः ॥

---

१ Thus (शल्मलिश्लेष्मणा) M, ०शच Be Ben H U, ०वत्राशुपि० G (sec. m.).

२ संयुता Ben, संयुक्तानि the other MSS.

३ om. Be.

४ All the MSS. exc. G ins. इति।

५ Wholly uncertain reading. I have accepted the reading given by Be; विदीदिहीविही M, विदिट्वहष्टीकिदी U, विदिद्विहष्टीकीदी H, विद - - दिकाकृति Ben, विद्दिभिः किद्दिहेति G (sec. m.).

६ Thus Be, उप्तंगोर्विदी० M, उपहतंगोविदी० the other MSS.

II. 245. 1. अथायं द्वादशाह उभयविधो भवत्यहीनो वा सत्त्रं वा । स[1] यद्यु[1] हैको[1] दीक्षते ऽहीनो भवत्यथ यदि बहवः सत्त्रं । यदि चैवाहीनो यदि च सत्त्रमुभयथैवोभयतोऽतिरात्रो भवत्यन्यतरतो ऽतिरात्रा ह्यहीना भवन्त्युभयतोऽतिरात्राणि सत्त्राण्यादेशादेवोभयतोऽतिरात्रो ऽहीनो भवत्यादेशात्तु[2] सत्त्रमनतिरात्रं यथैतदग्निष्टोमायनꣳ सारस्वतमयनं[3] विश्व-

II. 245. 7. सृजामयनमिति । कथमु खल्वेषाꣳ संनिवापः स्यादिति । सावित्रेभ्यः प्रथमꣳ संनिवपेरन्हुत्वा सावित्राणि विषमारोह्याग्निहोत्राणि जुहुयुरथ वायव्याय पशवे संनिवपेरन्वायव्येनेष्ट्वा विषमारोह्यैवाग्निहोत्राणि जुहुयुरथ यदि[4] दीक्षणीयायै संनिवपेरꣳस्तेषां तत्संन्युप्तान्येव[5] स्युर्युदवसानीयाद्युदवसायैव[6] प्रतिवेशा यज्ञपुच्छानि कुर्वीरन्कथमु खलु संदीक्षिता विष्णुक्रमान्क्रमेरन्निति । महापाशाभिपरीता[7] वा क्रमेरन्नपि वा

---

१ Thus Ben, सयद्येको the other MSS.

२ Before आदेशात्तु G (sec. m.) ins.: आदेशादनतिरात्रोऽहीनो भवति; the Viv. makes no mention of these words.

३ Thus U G (pr. m.) Ben, °स्वतामयनं the other MSS, only H: सारस्वतायनं ।

४ यद् M G U H.

५ ततत् instead of तत् G U, तेतत् H.

६ स्युर्युदवसाना° Ben, स्युर्युदवसानीयात्यु (द्यु) दव° Be M, स्याद्युदवसानीयादुदवसाय H, स्युवदवसानीयादुदवसाय G; cp. Āp. XXI. 2. 15.

७ Thus, hesitatingly, emended; °पाशाभिःपरीता MSS. and the V[i]v.

पाशानभिसंधित्वाभिक्रमः[१] स्यादथाह[२] क्रमस्वाथाह[२] क्रमस्वे-
II. 247. 1. III. 164. 1. त्यतिगुरुस्तथा[२] कल्पः स्याद्यथो एतत्सूत्रं भवति षष्ठ्यामुपसद्यु-
त्तरवेदिꣳ संनिवपन्त्यपि[३] वैकादश्यामित्यनग्निचय एवैतदुप-
II. 247. 11. पद्यते न साग्निचये । कथमु खल्वेषामहीनसंततिर्भवतीति ।
वसतीवरीणामभिग्रहणेनाध्वर्युः संतनोतीध्माबर्हिषोरुपकल्पनेन
च पयसां विश्रामनेन च वाचो[४] यम्येन[४] ब्रह्मातिप्रैषेण होता
पुनरभ्यासेन च सुब्रह्मण्ययोद्गाता[५] यज्ञस्य पुनरालम्भेन यज-
मानः[६] । प्रचरन्त एवैतद्ध्रुवाज्यꣳ समाददते । ऽथेमानि सव-
नानि बर्हीꣳषि संचिनुयुस्तेषां महाराच उत्थायाग्नीध्र
आज्यानि गृह्णन्तो ज्वलयेरन्निति । ॥ १२ ॥ अष्टमः ॥

II. 248. 3. कथमु खलु दिवा प्रातरनुवाकस्याह्न उपक्रमो भवतीति ।
तत्पत्नीसंयाजान्तं वा हृदयशूलान्तं वाहः कृत्वा समुपनह्य
राजानं काले वसतीवरीरभिगृह्याहीनसंततिं कृत्वा ग्रावो-
वायव्यꣳ संप्रक्षाल्य द्रोणकलशे दशापवित्रे समवधायाग्नीध्रं

---

१ Thus H U (without the visarga); पाशानभिः पर्यंहित्व॰ Ben, पाश्निनीःसंधित्वाभिक्रमः M Be G (the last two omitting the visarga at the end).

२ Thus G (which has only both times ॰थाहं instead of याह); instead of the second क्रमस्वेति Be H U have: क्रम इति, M: क्रमस्य इति।

३ Thus H only; ॰वपत्यपि G U Ben, ॰वपत्यैत्यपि M Be.

४ वाचयम्येन M. Is वाचंयम्येन the correct reading?

५ Thus G (sec. m.), ॰ण्यायोद्गाता all the other MSS.

६ Om. M.

हुत्वा समिद्धारा यन्त्याहृत्य समिध[1] आहवनीय उपसादयन्ति । परिहृतासु वसतीवरीष्वाहुतायाꣳ सुब्रह्मण्यायाꣳ सर्वेशनीयाः समिधो ऽभ्याधायेध्माबर्हिः संनह्य पयाꣳसि विश्रिष्याग्नीध्रं हुत्वाग्नीध्रे सर्वेशनरूपाणि कृत्वा प्रातःकर्मणा प्रतिपद्यते । प्रसिद्धेन महारात्रिकेण । सिद्धमत ऊर्ध्वमुपस्तम्भनं वा एतद्यज्ञस्य यदतिग्राह्यास्त्रके पृष्ठानीति । त्रिवृच्चैकविꣳशस्य चक्रे आग्नेय उपस्तम्भनं । पञ्चदशस्य त्रिणवस्य चक्रे ऐन्द्र उपस्तम्भनꣳ सप्तदशस्य[2] त्रयस्त्रिꣳशस्य[3] चक्रे सौर्य
III. 165. 5. उपस्तम्भनं । यथो एतद्बौधायनस्य कल्पं वेदयन्ते निर्मन्थ्यो मन्त्रवान्भवतीत्याध्वर्यवा एवात्र मन्त्रा आवर्तन्ते नाग्निमन्थ-
II. 250. 9. नीयाः । स्वयमृतुयाजमेवैतदहर्भवति[4] नैतदहरन्योन्यस्यर्तुयाजं यजतीति । ॥ १३ ॥

आश्राव्याध्वर्युरन्यस्मै ग्रहं प्रदायैतेनैव यथेतमेत्य जघनेन हविर्धाने उपविश्यर्तुसंप्रैषमुक्त्वोपोत्थाय हुत्वा व्यवनीय प्रदक्षिणमावृत्य यथायाचौत्तमप्राङासीनो होतृभक्षं भक्षयेत्प्रत्य-
II. 251. 10. ङ्ङासीनो[5] ऽध्वर्युभक्षं । पारुच्छेपीर्होता शꣳसति वालखिल्या मैत्रावरुणो विहरति वृषाकपिं[6] ब्राह्मणाच्छꣳसी शꣳसत्येवया-

---

१ M G Be U ins. आग्नीध्र ।

२ पंचदशस्य Be.

३ Thus Ben ; ॰त्रिंशतस्य the other MSS.

४ इति ins. U H, it is effaced in G.

५ Thus M ; प्रत्यग॰ the other MSS.

६ ॰कपीयं M.

महतमच्छावाकः । किंकर्मा[1] तर्ह्यध्वर्युर्भवतीति[1] प्रत्यागरणा-
II. 252. 11.तीत्येव[2] ब्रूयाद्यां एता अध्वर्युरनुष्टुभ उद्धृत्याहरति ताश्चतस्रो
गायत्र्यस्तास्तिस्रो ऽनुष्टुभः । सोम राजन्नेह्यवरोहेत्येतस्यै गायत्र्यै
पदमात्रेण राजानमुपावहरेत् । कथमु खलु दशममहर्भक्त्या[3]
सर्वचतुर्विंशं[4] च भवति[5] त्रिष्टोमं[6] चान्यत्र[7] तूष्णींस्तोमा-
दिति । चतुर्विंशो बहिष्पवमानः पञ्चदशं ब्रह्मसामं[8] त्रय-
स्त्रिंशमग्निष्टोमसाम । तासामु[9] ह नवागच्छन्ति[9] । ताश्चतु
र्विंशतिः संपद्यन्ते । एतदेवापि दशममहर्भक्त्या[10] सर्वचतु-
II. 256. 8.र्विंशं[11] च भवति त्रिष्टोमं चान्यत्र तूष्णींस्तोमादित्युपसृज-

---

१ Thus emended; किकमतिर्ह्य० Ben, किंकर्मातंह्य० Be G U, किंकर्मा-तंह्य० M, किकर्मातर्ह्य० H.

२ Thus G (sec. m.), प्रत्यागरणातीं M Be U H, वस्थायाणीतीत्येव Ben.

३ Thus Ben and the Viv. only; ०भंवतीति or ०भवति the other MSS.

४ Thus (and cp. XXVI, 16 init.) M Ben Be, सर्वचतु० G U H.

५ Om. G H Be.

६ Thus G M Be; भवतित्रिष्टदग्निष्टोमं U H, भवतीत्यग्निष्टोमं Ben.

७ Thus M Be (Ben defective), वा अन्यत्र G U H.

८ ०साम U (sec. m.) M G.

९ Doubtful and conjectural reading; तसामुहनन्वागच्छति Ben, तासा-मुहतन्वागच्छती M, तासामुहनगच्छंति G U H; Ben defective. The meaning is clear; त्रयस्त्रिंशानां मध्यं (r मध्यात्) नव पंचदशसु प्रक्षिप्यन्ते । तथा तयोः (i.e. the pañcadaśam brahmasāma or pañcadaśam mādhyandinam pavamānam and the trayastriṃśam agnistomasāma) चतुर्विंशं भवति ।

१० Thus G only (०भंक्त्या), ०भंवत्या all the other MSS.

११ सर्वचतु० Ben Be H.

न्माचे वत्सं धारयन्वरुणो धयन्निति । किंदेवत्या उ खल्वियमाकृतिर्भवतीति । प्राजापत्येत्येव ब्रूयादिति । ॥ १४ ॥

॥ नवमः ॥

TS. VII. 2. 8.

अथेमं द्वादशाहं यज्ञायैरेव प्रतिव्यूहामस्तस्य नवाहानि प्रतिव्यूहं गच्छन्ति यान्यन्यानि प्रायणीयोदयनीयाभ्यां दशमाच्चाह्नो । ऽय[1] छन्दोमास्तत्[1] षडेव[1] । खस्थानो[2] हि[3] प्रथमस्त्रिरात्रो[4] । गायत्रीप्रातःसवने[5] प्रथमे त्रिरात्रे[6] ऽष्टौ कृत्वो ऽग्रे प्रथममंशुपांस्वभिषवमभिषुणुयादेकादश कृत्वो द्वितीयं । द्वादश कृत्वस्तृतीयं । महाँ इन्द्रो नृवदा चर्षणिप्रा इत्येतया त्रिष्टुभा माहेन्द्रं गृह्णीयाददब्धेभिः सवितः पायुभिष्ट्वमित्येतया जगत्या सावित्रमष्टाकपालान्प्रातःसवनीयान्कुर्यादेकादशकपालान्माध्यंदिनीयान्द्वादशकपालांस्तृतीयसवनीयान्वसुमद्गणेन गायत्रच्छन्दसा प्रातःसवनीयान्मचयेद्रुद्रवद्गणेन त्रिष्टुपछन्दसा माध्यंदिनीयानादित्यवद्गणेन जगती-

---

१ ? Thus Be U H : यच्छंदोमास्ता: षडेव M, यत्छंदस्तत्षडेव G, वछंदस्तत् षडेव Ben ; the Vivaraṇa also has छंदस्तत् षडेव ।

२ स्वसम्थानो Ben. सधानो M.

३ Thus B G M, हि U हित् Ben H.

४ Thus, in accordance with the Vivaraṇa, U ; प्रथमसत्रिरात्रो the other MSS.

५ गायत्रीं प्रा० G.

६ Instead of त्रिरात्रे here and in the similar passages further on some of the MSS. (Ben H U) तिरात्रे ।

च्छन्दसा तृतीयसवनीयानित्यथ जगतीप्रातःसवने[1] द्वितीये त्रिरात्रे द्वादश कृत्वो ऽग्रे प्रथममुपांश्वभिषवमभिषुणुयादष्टौ कृत्वो द्वितीयमेकादश कृत्वस्तृतीयं। महाꣳ इन्द्रो य ओजसेत्येतया गायत्र्या माहेन्द्रं ग्रहं गृह्णीयादाममद्य सवितरित्येतया त्रिष्टुभा सावित्रं। द्वादशकपालान्प्रातःसवनीयान्कुर्यादष्टाकपालान्माध्यंदिनीयानेकादशकपालाꣳस्तृतीयसवनीयानादित्यवद्गणेन जगतीच्छन्दसा प्रातःसवनीयान्सचयेद्वसुमद्गणेन गायत्रच्छन्दसा माध्यंदिनीयान्रुद्रवद्गणेन त्रिष्टुप्छन्दसा तृतीयसवनीयानित्यथ[2] त्रिष्टुप्प्रातःसवने[3] तृतीये त्रिरात्र एकादश कृत्वो ऽग्रे प्रथममुपांश्वभिषवमभिषुणुयाद्द्वादश कृत्वो द्वितीयमष्टौ कृत्वस्तृतीयं। महाꣳ इन्द्रो य ओजसेत्येतां गायत्रीं त्रिरभ्यावर्तयेदनुपथामाꣳ। सा जगती संपद्यते। तया माहेन्द्रं गृह्णीयाद्धिरण्यपाणिमूतय इत्येतया गायत्र्या सावित्रमेकादशकपालान्प्रातःसवनीयान्कुर्याद्द्वादशकपालान्माध्यंदिनीयानष्टाकपालाꣳस्तृतीयसवनीयान्रुद्रवद्गणेन त्रिष्टुप्छन्दसा प्रातःसवनीयान्सचयेदादित्यवद्गणेन जगतीच्छन्दसा माध्यंदिनीयान्वसुमद्गणेन गायत्रच्छन्दसा तृतीयसवनीयानिति। ॥ १५ ॥

॥ दशमः ॥

---

१ Corrected; जगतींप्रा॰ G M Be, जगत्प्रा॰ H U; Ben has a lacuna.

२ इति om. Ben G U.

३ Thus M Be; त्रिष्टुभःप्रा॰ Ben U H G (pr. m.), त्रिष्टुभंप्रा॰ G (sec. m.).

II. 261. 12. अथायं वैषुवतो लभेत मासगणानामित्येक आहुः सप्त-
II. 262. 8. दश दीक्षा द्वादशोपसदो वैषुवतं त्रिंशत्तमं । कथमु खलु
गोआयुभ्यां स्तोमा[1] भवन्तीति[1] । गोर्नु खलु पञ्चदशो
बहिष्पवमानस्त्रिवृन्त्याज्यानि सर्वसप्तदशं[2] माध्यंदिनं[3] सवनं
सर्वैकविंशं तृतीयसवनं सोक्थ्यमथायोस्त्रिवृद्बहिष्पवमानः[4]
पञ्चदशान्याज्यानि सर्वसप्तदशं[5] माध्यंदिनं सवनं सर्वैकविंशं
II. 261. 11, 18. तृतीयसवनं सोक्थ्यमथेमौ विश्वजिदभिजितावग्निष्टोमौ
सत्त्रगतौ भवतः । के[6] नु[6] खल्वेतयो स्तोमा[7] भवन्तीत्यभि-
जिन्नु[7] खलु त्र्युदयश्चतुरावृत्तो । ऽथ विश्वजिच्चतुरुदयस्त्र्या-
वृत्तः[8] । कथमु खल्वेकविंशतिगर्भा भवतीत्यभिजितमुपेत्य
पृष्ठ्यं षडहमुपेयुरथ त्रीन्परःसाम्नो ऽथ वैषुवतमथ त्रीन्प्रत्य-
क्साम्नो ऽथावृत्तं पृष्ठ्यं षडहमथ विश्वजितं । कथमु खलु
गोआयुषी विहृते जानीयादिति[9] । पुरस्तादभिजितो गामु-
पेयात्स्वस्थान एवायुर्भवतीति । कियन्तो नु खलु गवामयने

---

१ Thus Be G U and the Viv.; स्तोमा भवतीति H, स्तोमो भवतीति M.

२ Thus Be M; सर्वंस॰ G U H Ben.

३ Thus G (sec. m.); ध्यंदिनाना all the other MSS

४ ॰मानं MSS.

५ Thus M Be; सर्वस॰ G U Ben, सर्वतःस॰ H.

६ कोनु M H U Be G (pr. m.), कत G (sec. m.), कानु Ben.

७ Thus M Ben G; ॰मो भवतीं H U Be.

८ ॰चतुरस्त्र्यावृत्तः M H Be (the last two ॰वृत्तः). Ben defective.

९ इति Supplied by me.

ऽग्निष्टोमा भवन्तीति । ज्योतिरग्निष्टोमस्त्रिवृदग्निष्टोमो विश्व जिदभिजितावग्निष्टोमौ वैषुवतं दशममहर्महाव्रतमिति सप्तेति ह वा इदं गवामयनं प्रज्ञातस्तोमं ब्रुवते । तस्य होत्तरं पच आवृत्तं भवति यदन्यद्गोआयुर्भ्यां च दशरात्राच्च । अनीका-नचावृत्तान्यहान्युद्धीयात् । ॥ १६ ॥

अथेमा द्वात्रिंशतमेकादशिन्यो गवामयने । तेषां[1] पूर्व-
स्मिन्पक्षसि षोडश निष्ठीयन्ते सप्तदश[2] एकादशिन्यै बार्ह-
II. 265. 11 स्पत्यो वैषुवते[3] सवनीयः संपद्यते । तस्य नवाहान्यपशुकान्य-
तिरिच्यन्त इति । कतमानि खल्विमान्यहानि भवन्तीति ।
पृष्ठ्यस्य षडहस्योत्तराणि त्रीणि त्रयश्छन्दोमा दशममहर्महा-
II. 262. 12 व्रतमुदयनीयो ऽतिरात्र इत्यभिप्लवांश्चाचीयन्ति च तदङ्गि-
रसामयनमिति । पृष्ठ्यानामत्र स्थाने ऽभिप्लवानेव दधाति ।
पृष्ठ्यांश्चाचीयन्ति च तदादित्यानामयनमित्यभिप्लवानामत्र
स्थाने पृष्ठ्यानेव दधात्यग्निष्टोमांश्चाचीयन्ति च तत्प्रजापते-
रयनमित्युभयेषामत्र पृष्ठ्याभिप्लवानां स्थाने ऽग्निष्टोमानेव

---

१ Thus M G Be Ben U, तासां H, cp. Āp. XXI. 23. 2.

२ Thus G (sec. m.) and the Viv.; सख्या ins. M Ben, ख्या ins. Ben U G (pr. m.); H. defective; meaning and interpunction uncertain; cp. Āp. XXI. 23. 2.

३ Thus M U Be H Ben; ॰वतः H G (sec. m.), ॰वतेः G (pr. m.), ॰वतेऽ Ben.

II. 267. 9. दधात्याघाटीभिः[१] पिञ्छोलाभिः[२] कर्करीकाभिरित्याघाटो[३]
ऽह[३] कोलोष्ठा[४] भवन्ति । पिञ्छोला[५] उ ह वीणाकाणभ्रम्रा[६] ।
II. 267. 5. वीणा[७] उ कर्करीकास्तं[८] काल एव प्रस्त्याहणत्तीत्याहन्यादि-
त्येवेदमुक्तं[९] भवति । ॥ १७ ॥ एकादशः ॥
अथ वै भवति ब्रह्मवादिनो वदन्ति स त्वै यजेत यो
ऽग्निष्टोमेन यजमानो ऽथ सर्वस्तोमेन यजेतेति । चत्वारि
पञ्चदशान्याज्यानि । तौ द्वौ त्रिंशद्गौ । तयोरितरस्मिंस्-
त्रिंशद्गे तिस्र उपास्यति । तौ द्वौ त्रिणवत्रयस्त्रिंशौ ।
II. 269. 16. गायत्रं पूर्वं ऽहन्साम भवति त्रैष्टुभमुत्तर इति होतुराज्य-

---

१ Thus G M U, ०ढिभिः Be H.

२ Thus (पिंछा०) H U G (sec. m.), पिछो० G (pr. m.) Be M, पिषो० Ben.

३ कर्करी० Ben, कर्करि० the other MSS.—०घाद्योरह Ben H U, ०द्योरह Ben, ०घाटयोरह M, ०धाद्यउह G.

४ ? कोलोष्ठो H, कोलोष्ठा G, कोलोष्ठो M U, कालोष्टो Ben, कोलोषो Be (compound of काल-घोष ?).

५ Thus M H U, पिछोला Be G पिटखोला Ben.

६ ? ? Thus read U H Be (with var. ०भ्रमा), वीषाकाणाकाभ्रमा M, वीषाकांब्रभ्रूपा G.

७ Thus G only; वीषामा Be H U M, वीषाकौ Ben.

८ MSS., exc. Ben, कर्करिका० ; perhaps the form with short *i* is, after all, preferable.

९ Emended in accordance with the text proper; instead of ०मुक्तं० the MSS. read ०मंतो० ।

II. 270. 6. न्येतानि[1] संपादयेदेवमेवोत्तरे ऽह्नि होतुरेवाज्ये । अथास्यैषा[2]
सहस्रतम्यन्यतएनी कण्डूकृतोपक्लृप्ता[3] भवतीति । सꣳसेविते-
त्येवेदमुक्तं भवति । कस्मिन्नु खलु काले लक्ष्मणां पष्ठौहीं
II. 273. 7. वार्त्रघ्नीं दद्यादिति । संग्रामं जित्वा राजन्य एनां[4] दद्यात्कथमु
खलु गर्गत्रिरात्रेणर्तुमुखेषु विहृतेन यजेतेत्याषाढे वा[5] श्रावणे
वा पक्षे ऽग्निष्टोमेन वा[6] यजेत । तत्पत्नीसंयाजान्तं वा हृदय-
शूलान्तं वाहः कृत्वा समुपनह्य राजानं काले वसतीवरीरभि-
गृह्याहीनसंततिं[7] कृत्वा ग्रावोवायव्यꣳ संप्रक्षाल्य द्रोणकलशे
दशापवित्रे समवधायाग्नीध्रं द्रुत्वा समिद्धारा यन्त्याहृत्य
समिध आहवनीय उपसादयन्ति । परिहृतासु वसतीवरी-
ष्वाहृतायाꣳ सुब्रह्मण्यायाꣳ संवेशनीयाः समिधो ऽभ्याधाये-
ध्माबर्हिः संनह्याविग्रिय्य[8] पयाꣳस्युपवसन्त्यथ श्वो भूते सव-
नेष्ट्या यजेत । तत[9] स्तम्बयजुर्हरति । स एवमेवाहरहर्वसती-

---

१ Thus G U H, होतुराज्यानि Be, होतुराज्यानि एतानि M, होतुरात्रि-तानि Ben.

२ या° M.

३ Thus Ben M U, कंडकृतो° Be, °कंडूकृतो° G H.

४ एतां Be.

५ Om. all exc. Ben.

६ Is वा to be cancelled ?

७ °वरीभिः परिगृह्य Ben H.

८ Thus G Be U H ; °ह्यविशि° the other MSS.

९ तत om. M. Ben ; are we to remove it or to read as infra (k. 19). तत्र न ?

वरीः परिहरमाणश्चतुरो मासः सवनेष्ट्या यजते । नाग्निहोत्रं जुहोति न दर्शपूर्णमासाभ्यां यजते । ऽथ चतुर्षु मासेषु पर्यवेतेषु परिहृतासु वसतीवरीष्वाहृतायाꣳ सुब्रह्मण्यायामहरहः संवेशनीयाः समिधो ऽभ्याधायेध्माबर्हिः संनह्य पयाꣳसि विग्रिह्योपवसन्ति । ॥ १८ ॥

अथ श्वो भूत उक्थ्येन यजते । तत्तथैव पत्नीसंयाजान्तं वा हृदयशूलान्तं वाहः कृत्वा समुपनह्य राजानं काले वसतीवरीरभिगृह्याहीनसंततिं[१] कृत्वा ग्रावोवायव्यꣳ संप्रक्षाल्य द्रोणकलशे दशापवित्रे समवधायाग्नीध्रं द्रुत्वा समिद्धारा यन्त्याहृत्य समिध आहवनीय उपसादयन्ति । परिहृतासु वसतीवरीष्वाहृतायाꣳ सुब्रह्मण्यायाꣳ संवेशनीयाः समिधो ऽभ्याधायेध्माबर्हिः संनह्याविग्रिह्य[२] पयाꣳस्युपवसन्त्यथ[२] श्वो भूते सवनेष्ट्या यजते । तत्र तथैव न[३] स्तम्बयजुर्हरति । स एवमेवाहरहर्वसतीवरीः परिहरमाणो ऽपराꣳश्चतुरो मासः[४] सवनेष्ट्या[४] यजते । नैवाग्निहोत्रं जुहोति न दर्शपूर्णमासाभ्यां यजते । ऽथ चतुर्षु मासेषु पर्यवेतेषु परिहृतासु वसतीवरीष्वाहृतायाꣳ सुब्रह्मण्यायामहरहः संवेशनीयाः समिधो ऽभ्याधायेध्माबर्हिः संनह्य पयाꣳसि विग्रिह्योपवसन्त्यथ श्वो भूते

---

१ ॰वरीभि. परिगृ॰ G U.

२ Thus M U G; संनह्य पयांसि विग्रिह्योप॰ the other MSS.

३ न read by all the MSS., but seems to be expunged in M.

४ Thus M U H; मासांस्सव॰ Ben G, मासास॰ Ben.

II. 273. 1 *sqq.* ऽतिरात्रेण यजते सयत्नपुच्छेनायेताꣳ सहस्रतमीं प्राचीं वोदीचीं वावर्तयꣳस्तया[1] विहारं चात्मानं च न व्यवेयादिति। ॥ १९ ॥ द्वादशः ॥

किंदक्षिणा उ खल्वहीना भवन्तीत्यहर्गणोऽहर्गणः सहस्रदक्षिणः स्यादित्येतदेकमेकैकमहः सहस्रदक्षिणꣳ स्यादित्येतदेकं। द्वादशशतदक्षिणꣳ स्यादित्येतदेकं। यथाश्रद्धदक्षिणꣳ स्यादित्येतदपरमादेशादेवैतस्मिन्नतिरात्रे सहस्रमनुविहितं ददाति। द्विरात्रप्रभृतयो ऽहीना भवन्त्यैकादशरात्रादथेमान्यहीनाभिपरीतानि[2] सत्राणि भवन्ति यथैतत्संवत्सरगर्भ[3] एकादशरात्र। उभयविधो हि भरतद्वादशाहो। द्वादशाग्निष्टोमा रथंतरसामानः। स ह भरतद्वादशाहो। ऽथोद्यत्स्तोमेषु
III. 168. 10. त्रिवृत्प्रथममहः स्यात्पञ्चदशं द्वितीयꣳ सप्तदशं तृतीयमेकविꣳशं चतुर्थमितीदवेकमथापरस्त्रिवृत्प्रथमस्याह्नः[4] प्रातःसवनं पञ्चदशं माध्यंदिनꣳ सवनꣳ सप्तदशं तृतीयसवनमथ[5] द्वितीयस्याह्नः

---

१ Thus M; वावर्तयन्स्तया G, वावर्तयस्तया U Ben H.

२ Thus G; ०हीनाभिः पेरी (or रि) तानि the other MSS.; ऽहीनापतितानि or ऽहीनाचरितानि the Vivaraṇa; cp. infra k. 21 s. fin.

३ Thus Ben; यथैनत्सं० the other MSS.

४ ०मितीन्वे० or मितील्वे० MSS.; the following is doubtful; ०कमथापरंसत्रिष्ट G U Ben U M, but in M स is effaced; ०कमयापरं सर्वत्रिष्ट० Ben. The Viv. has ऽपरस्त्रिष्ट०; if this is the correct reading, we ought to correct also एकम् into एको।

५ The MSS. here are defective; the passage has been restored by me according to Sāyaṇa on TS. VII. 1. 8 (ed. Calc. Vol. VII, 198).

पञ्चदशं प्रातःसवनꣳ सप्तदशं माध्यंदिनꣳ सवनमेकविꣳशं तृतीयसवनमथ तृतीयस्याह्नः सप्तदशं प्रातःसवनमेकविꣳशं माध्यंदिनꣳ सवनं त्रिणवं तृतीयसवनमथ चतुर्थस्याह्न एकविꣳशं प्रातःसवनं त्रिणवं माध्यंदिनꣳ सवनं त्रयस्त्रिꣳशं तृतीयसवनम् । ॥ २० ॥

III. 168. 12. अथेम औपसदाः पुरोडाशाः शूर्पादानप्रभृतय आम्नाताः । स्रुवाहुत्या चैनान्सह सहस्रुहुयादौपमन्यवीयेन[1]
II. 275. 8. कल्पेनाग्नेयानेककपालाननुसरस्वति[2] प्राञ्चो यान्तीत्याहवनीयसकाशाच्छम्यां प्रास्येत्सा यत्र निपतेत्तद्गार्हपत्यस्यायतनꣳ स्यात्प्राचीनं[3] तत आहवनीयो । ऽथ यद्युपर्याणा अप उपाधिगच्छेयुरपोनप्त्रीयं चरुं तृतीयसवनीयानामनुनिर्वाप्यं कुर्युर्यथोपोत्तरेयुः समाप्यलेव[4] शम्यां प्रास्येत्स्थदा भवन्ति पञ्चाहा
III. 170. 5. भवन्तीत्यभिप्लवानामेवैते[5] ऽपच्छेदा[5] भवन्त्यष्टमे ऽह्नि वाजपेय इति[6] । तत्र यदेव सुत्याभिपरीतं वाजपेयिकं कर्म

---

१ Thus Ben, ॰न्यवेन the other MSS.

२ Thus G (sec. m.) only; ॰नुसरस्वती all the other MSS. and my two copies of the Vivaraṇa.

३ कुर्वन्ति instead of स्यात् G (sec. m.).

४ ? Thus M G; ॰लेव U H; समाप्येत Ben, सःसमाप्यग्यत्नेव Be; the Viv. gives the periphr.: उत्तीर्य समादे(दे)शात् ।

५ Uncertain; ॰वैतेपच्छदा Be, ॰वैवेपच्छेदा H, वैवे-च्छदा Ben, ॰वैतेपच्छेदा U and G (pr. m.), ॰वैतेतपदा G (sec. m.), ॰वैतपच्छेदा M. The Vivaraṇa periphrases: अभिप्लवानामेवान्ते ऽपि (or ॰वान्तेऽपि) न पाश्चाः ।

६ इति Supplied by me.

II. 279. 14. तत्कुर्याद्येदꣳ सꣳसदामयनमच्छन्दोमं[1] भवतीति । विज्ञा-
यत[2] उ खल्वस्य छन्दोमभक्तयश्चतुर्विꣳशं चतुश्चत्वारिꣳश-
मष्टाचतुर्विꣳशमिति । ॥ २१ ॥ त्रयोदशः ॥

II. 283. 1. अथायमतिरात्र उभयविधो भवत्यहीनो वैकाहो वापि
तु खल्वस्याहीनस्यैव रूपं । द्वादशोपसदो ऽनेकमहरभि-
विधत्ते[3] । ऽथैकाहस्यैव रूपꣳ । सकृदसतीवरीर्गृह्णाति सकृ-
II. 285. 13. त्पशूनुपाकरोत्येकं[4] क्रतुकरणꣳ । समयाविषिते सूर्ये हिर-
ण्येन षोडशिन स्तोममुपाकरोतीत्यर्धास्तमित इत्येवेदमुक्तं[5]
भवति । तस्य चेदनुपाकृत आदित्यो ऽभ्यस्तमियाद्गार्हपत्ये तिस्रः
स्रुवाहुतीर्जुहुयाद्भूर्भुवः सुवरित्यथ यस्योक्थ्ये ऽतिरिच्येताति-
रात्रं कुर्वीतेत्यतिक्रान्ताः खल्वस्य दीक्षोपसदो ऽतिक्रान्तं क्रतु-
करणमतिक्रान्तꣳ षोडशिनो ग्रहणमथ तदानीमेव षोडशि-
पात्रमुपकल्प्य तिसृभिर्ऋग्भिर्गृह्णीयाद्यैतेन[6] पुरस्ताद्रात्रि-
पर्यायेभ्यश्चरेत्तच्चैवमेव संप्रैषः[7] प्रतिप्रस्थातराग्रयणात्तृतीयं गृद-

---

१ Thus (and cp. TS. VII. 4. 2. 3, Pañc. br. XXIII. 19. 8) M G U H; ॰यनछंदोमं Be, ॰यनंमछंदोमं Ben.

२ r. विज्ञायन्त ?

३ Thus G (sec. m.), नेकाम॰ Be, नैकाम॰ M Ben G (pr. m.) U (sec. m.), ण्यैकाम॰ H.—Instead of अभिविधत्ते (thus M Be G U), Ben: अभिविद्यते, H. अभिद्यते । The Viv.: अहीनरूपकं द्वादशोपसत्कत्वमेकस्मिन्नहन्यसमाप्तत्वं च ।

४ Thus M G U Be; ॰त्यकं Ben, त्वेवं H.

५ इति om. all exc. M.

६ Thus M Ben; ॰थैतेन G Be U.

७ प्रेषः M G U.

तृतीयानि[१] जाघनीः पृषदाज्यं गोपायाग्नीदाश्विनं ते द्विक-
II. 290. 11. पालः श्रुतमप्यपररात्रे ऽस्त्विति । कस्मिन्नु खलु काल आश्विनो
द्विकपालो निरुप्यत इति । तार्तीयसवनिकैर्वा पुरोडाशैः[२]
सहापि वा पुरस्तादुत्तमस्य रात्रिपर्यायस्य । त्रिवृद्वै स्तोमाना-
II. 309. 11. मवमस्त्रिवृत्परम इत्यतिरात्रब्राह्मणमेवैतद्भवत्यथैषः सौत्रा-
मणिकी सुरा पादकिण्वा[३] वा[४] भवत्यपि वा पञ्चिका ।
शष्पाणि च तोक्माणि[५] चेति । यवानामु[६] ह[६] शष्पाणि
II. 309. 15. भवन्ति व्रीहीणामु ह तोक्माणि[५] मासास्तु नग्नहुरथायं कारो-
तरो दारुमयो वा वैदलो[७] वा मृन्मयो वा चर्मणा लेवाभि-
विद्धि[८] स्यादथैषः सुतासुतीति । सुतमु[९] हास्यासुच भवत्या-
II. 331. 7. सुतमु[१०] हास्येह भवत्यथास्मिन्दाक्षायणयज्ञे कुर्यादुपांश्वयाज-
मिति । ॥ २२ ॥ चतुर्दशः ॥

---

१ Om. G U H Be.

२ पशुपुरो॰ H, पौरोडाशैः M.

३ पादकोष्वा H U, पाकोष्वा G, पादक्षिणा M, पादक्षिण्वा Be. The Viv., although corrupt, mentions the word किण्वा ।

४ वा om. H Ben.

५ ॰ष्मि both times G Be, once ॰ष्मि once ॰क्मि M, ॰क्मि both times Ben H U.

६ यथानांह Ben ; read perhaps यवानामह ।

७ वैदलो M H U Ben, वै॰ G Be.

८ Thus all exc. Ben (॰विंद्दि). The Viv. seems to give the paraphrase: कर्मणा (r. च॰) वध्योषः (var. वध्योषः) ।

९ r. सुतमस्यासा॰ ?

१० ॰भवत्यसुतमु Ben, भवत्यासुतमो M Be H.

II. 292. 1. अथास्यामेकादशिन्यां यूपाहुतिस्तन्त्रं याम्नौ हूयते। ऽथा-
प्रश्वनजा संचारिणी। सꣳस्पर्शकं[1] कर्म तद्भवत्यग्निष्ठां[2] प्रथम-
स्याश्रिꣳ[2]सकृदांहन्याद्विर्द्वितीयस्य त्रिस्तृतीयस्यैवमेवेतरेषामनु-
पूर्वं छेदनज्ञायाय चाथ वेदिविमानं। दशानां च रथाक्षाणा-
मेकादशानां च पदानामष्टाङ्गुलस्य च[3] चतुर्विꣳशं भागमाद-
II. 293. 9. दीत। स प्रक्रमः स्यात्तेन वेदिं विमिमीताथेमावुपस्थावानौ
चतुरङ्गुलमात्रेण विक्लष्टतमौ[4] स्यातामथेतरे रथाक्षान्तराला[5]
II. 293. 10. एव स्युरित्यथ वै भवत्युपरसंमितां मिनुयात्पितृलोककाम-
II. 293. 12. स्येति यावत्यग्निष्ठस्योपरं[6] तावन्मात्रा इतरे भवन्ति। चषाल-
संमितामिन्द्रियकामस्येति यावदग्निष्ठस्य रशना तावन्मात्रा
II. 293. 13. इतरे भवन्ति। सर्वान्समान्प्रतिष्ठाकामस्येति सर्वान्समान्प्रतिष्ठा-
II. 293. 14. कामस्य करोति। ये त्रयो मध्यमास्तान्समान्पशुकामस्येति
II. 294. 1. तान्समान्पशुकामस्य करोति। व्यतिषजेदितरानिति[7] स एवमेव
II. 294. 3. दक्षिणमुत्तरमित्यष्टौ यूपान्व्यतिषजत्यथ वै भवति यं कामयेत
प्रमायुकः स्यादिति गर्तमितं तस्य मिनुयादुत्तरार्ध्यं वर्षिष्ठमथ

---

१ सस्पर्दूक Be. Instead of सꣳस्पर्शकं कर्म a citation in the Mahāgni-sarvasva gives संस्पर्शि कर्म।

२ Thus according to Ms. (text and comm.); °ग्निष्ठांतस्याश्रिꣳ the MSS.

३ Om. Ben Be U; cp. XXX. 4.

४ विप्रक्ल° M Ben.

५ °चांतस्यादा M Be, चांतस्यादा H.

६ Thus MSS.; r. यावदग्नि°?

८ M Ben ins. व्यतिषजति।

ह्रसीयाꣳसमित्युत्तरार्ध्यमत्र वर्षिष्ठं मिनोति दक्षिणार्ध्यं ह्रसी-
याꣳसमेष वै गर्तमित्यस्यैवं मिनोति ताजक्प्रमीयत इति
II. 294. 6. ब्राह्मणं । दक्षिणार्ध्यं वर्षिष्ठं मिनुयात्सुवर्गकामस्याथ ह्रसीयाꣳ-
समिति ॥ २३ ॥

अङ्गुष्ठपर्वमात्रेणाङ्गुष्ठपर्वमात्रेणोत्तरमुत्तरं यूपꣳ ह्रसी-
याꣳसं मिनुयादपि वा यूपावटानामेवैता मात्रा अतिखनेदपि
वोपशयमेवोपनिदधते[१] । ताभिर्मात्राभिरभिसंपादयेत्कथमु
खलु यूपावटाꣳश्च परिलिखतो यूपाꣳश्चोच्छ्रयतः[२] पशूꣳश्चो-
पाकुर्वतः संचरो[३] स्यादित्यन्तरेणाग्निष्ठं[४] चोपस्थावानं चोपा-
तीत्य जघनेनोत्तरवेदिं परिक्रम्यान्तरेणाग्निष्ठं[५] चैवोपस्थावानं[६]
चोपातीत्यैकैकं परिलिखेद्वोच्छ्रयेद्वोपाकुर्याद्वापि वा यंयं
परिलिखेद्वोच्छ्रयेद्वोपाकुर्याद्वा तंतं न व्यवेयाद्दक्षिणेन दक्षिण-
मुत्तरेणोत्तरमपि वा सर्वानेवाग्रेण यूपान्परीत्यैकैकं परिलि-
खेद्वोच्छ्रयेद्वोपाकुर्याद्वा । व्यतिषङ्गं[७] तेन पूर्वाः संपद्यन्त । एवं

---

१ ॰निधत्ते U.

२ ॰च्छ्रयतां M, ॰च्छ्रयतो Ben U.

३ Corrected; कःसचरो M G Be H, कःसंचारो Ben, कंसंचरो U. The Mahāgnisarvasva संचरः (without कः). संचरो (cp. also XXV. 20 : 251. 4) has the meaning of मार्गः (Viv.).

४ ॰ष्ठां most of the MSS.

५ Thus M and a citation in the Ms.; ॰णाग्निं the other MSS.

६ एव given by Ben only.

८ ॰षंगे Ben, ॰षग Ben, ॰षंगं H.

व्यतिषक्तानामेवैतेषां पशूनां[१] पञ्च दक्षिणार्ध्यान्पशूनुपक्रम्यैव[२]
स्थापयेयु।र्वाहणं प्रथममत्यानयेयुरथानुपूर्वमितरान।न्तरेण चा-
त्वालोत्करावुदङ्ङुपनिष्क्रम्य[३] प्रस्थान्वा[४] निहन्युरपि वा मण्डली-
कृताꣳस्ते।षां वपा उत्खिद्याहरेयुर्यथा[५] वपाभिर्विहारं चात्मानं
II. 296. 3.च न व्यवेयु।र्याथायं पात्नीवतो ऽङ्गुष्ठपर्वमात्रेणोत्तरार्ध्याद्यूपाद्ग्रसी-
यान्स्यादपि वा यथाब्राह्मणमवाङ्नाभिमचषालमनवस्तीर्ण-
II. 297. 15.।मथेदꣳ[६] सर्पाणामयनꣳ स्तोमतो विहृतं भवत्य।थेदं विश्व-
II. 298. 11.सृजामयनं कथमिदानीन्तनेषु स्यादिति। शतं दीक्षाः शत-
मुपसदः सहस्रं[७] प्रसुतः[७]। ॥ २४ ॥ पञ्चदशः ॥
II. 299. 10. अथेदं कुण्डपायिनामयनमग्निहोत्रपूर्वमेके ब्रुवते सोमपूर्व-
मुपयन्ति[८]। तत्पत्नीसंयाजान्तं वा हृदशूलान्तं वाहः कृत्वा

---

१ Om. Ben Be.

२ पशून् ins. all the MSS. exc. Ben (cp. XVII. 14 : 295. 10).

३ °ष्क्रमय्य G U.

४ Thus Ben only and Ms. (प्रस्थानुक्तक्रमावस्थितान्), and the Vivaraṇa (प्रस्थान्यथा स्थितानि (sic) स्युः); प्रतिप्रयावा U (pr. m.), प्रति-प्रस्थातावा the other MSS.

५ Thus the Ms. (तेषां संज्ञप्तानां वपाः अध्वर्युणा उत्खिन्नाः परिकर्मिण आहवनीयं प्रति नयेयुः); उत्खिदेयुर्यथा the MSS.

६ अनवस्थितम् instead of अनवस्तीर्णम् G (sec. m.).

७ These words are missing in G Be U H; प्रसुतः M, प्रस्तुतं Ben.

८ Uncertain reading; °मुपयंति G (sec. m.) Ben; °मुपसं U H, °मुभयं M, °मुपैवसथं Be; the Viv.: स एव चारम्भणीयमहः।

समुपनह्य राजानं काले वसतीवरीरभिगृह्याहीनसंततिं[1] कृत्वा ग्रावोवायव्यꣳ संप्रचाल्य द्रोणकलशे दशापवित्रे समवधायाग्नीध्रं हुत्वा समिद्धारा यन्त्याहृत्य समिध आहवनीय उपसादयन्ति। परिहृतासु वसतीवरीष्वाहृतायाꣳ सुब्रह्मण्यायाꣳ संवेशनीयाः समिधो ऽभ्याधायैभ्यावर्हिः संनह्याविशिष्य पयाꣳस्युपवसन्त्यथ श्वो भूत आमावास्येन हविषा यजते। तत्र न साम्यजुर्हरति। त एवमेवाहरहर्वसतीवरीः परिहरमाणा अष्टाविꣳशतिमहान्यामावास्येन[2] हविषा यजन्ते। नाग्निहोत्राणि जुह्वति न पौर्णमासीं यजन्ते। स यत्र तृतीयसवने धिष्णियान्विहरति तदजस्रं मार्जालीयं करोति। समासन्नेषु हविःषु गार्हपत्ये करम्भपात्राण्यभिपर्यग्नि कृत्वा तैर्मार्जालीये प्रचरति। गार्हपत्य एव पिण्डपितृयज्ञꣳ श्रपयित्वा तेन मार्जालीय एव प्रचरति। प्रतिपूरुषमुवेवैषां[3] प्रवरान्प्रवृणीत। एकैकस्यैवैषां त्रयस्त्रयः पिण्डास्ते पञ्चदश[4]। महापितृयज्ञे स्तीर्णं[5] बर्हिर्भवति न वेदिमालिखति[6] न साम्यजुर्हरति नाज्यानि गृह्णीते। स यत्र

---

१ Emended (cp. XXVI. 18, 19); •वरीभिः परिगृह्या• U H, वरीरभिपरिगृह्या• M G Ben, •वरीभिपरिगृह्या• Be.

२ Emended; •विंशतिरहा• MSS.

३ Thus M G U H and the Viv.; •पुरुष• Ben Be.—•मुवेवैषां my conjecture (उवेव = उ एव), •मुवैवैषां MSS. exc. G (•मुवेवैषां)।

४ पंचदशा M Ben Be.

५ स्तीर्णं M Be H.

६ After लिखति Ben ins. न खनति।

तृतीयसवने धिष्ण्यान्विहरति तदञ्जसं मार्जालीयं करोति'
समासन्नेषु हविःषु गार्हपत्ये महापितृयज्ञहवींऽषि श्रपयित्वा
तैर्मार्जालीये प्रचरेदा'हवनीये मारुत्या प्रचरेद'न्तमेवावभृथः[1]
परीयाद्वि'तृतीया[2] वेदिर्भवति प्रक्रमाणाम्तु ह तृतीयं नवमस्तु[3]
भूमेर्भागो भवतीति ' ॥ २५ ॥ षोडशः ॥

II. 302. 12. अथ पञ्चहविषमिष्टिमिष्ट्वान्वहं पुनरावृत्तमेकैकेन हविषा
यजेतै'कं चेद्द्वे वा हविषी पर्यवेते स्यातामथ संवत्सरः समा-
प्येत कथं तत्र कुर्यादिति ' प्रतिकृष्यैतस्य पक्षस्य पञ्चहविष-
II. 302. 16. मिष्टिं निर्वपेद'थ संवत्सरतमे ऽह्नि पञ्चहविः स्यादिति ' प्रथमे
द्वादशाहे ऽग्निं चिन्वीतेति ' प्रथमे द्वादशाहे ऽग्निं चिन्वान-
श्चतुरहं प्रथमयोपसदा गच्छेच्चतुरहं मध्यमयाष्टाहोनाऽ संव-
त्सरमुत्तमयाथे'तराऽश्चतुरहोनाऽश्चतुरहोनानेकैकया[4] चतुर-
श्चतुरो[5] मासान्प्रत्याददीत ' चतुरहं प्रथमयोपसदा गच्छे-
च्चतुरहं मध्यमया चतुरहमुत्तमया'पि वा चतुरश्चतुर एव
मासानेकैकयोपसदा गच्छेदित्यु'त्तमे[6] द्वादशाहे ऽग्निं चिन्वी-
तेत्यु'त्तमे द्वादशाहे ऽग्निं चिन्वानो ऽष्टाहोनाऽ संवत्सरं प्रथम-

---

१ Thus M (sec. m.) G; ०रेदंतमथावभृथः Be; ०रेदंतमेथावभृथः U H, ०रेदन्त एवावभृथः Ben; cp. the Vivaraṇa: अवभृथोऽन्तं गच्छेत्।

२ Thus (परीयात्) M Ben; प्रतीयात् the other MSS.

३ नवमंच Ben.

४ Instead of इतरान् (thus Ben M the Viv.) इमान् H Be G U.

५ Thus G U M H Be; चतुरहश्चतुरहोनान् Ben.

६ इति om. G.

योपसदा गच्छेच्चतुरहं मध्यमया चतुरहमुत्तमयाथेतरांश्च-तुरहोनानेकैकया[1] चतुरश्चतुरहोनान्मासान्प्रत्याददीत[2] । चतु-रहं प्रथमयोपसदा गच्छेच्चतुरहं मध्यमया चतुरहमुत्तमयापि वा चतुरश्चतुर[3] एव मासानेकैकयोपसदा गच्छेदिति । ॥ २६ ॥

II. 393. 6. अथ लोकंपृणा इष्टका उपदधन्मासमेतीति । लोकंपृणा इष्टका उपदधन्मासं गत्वा त्रिंशत्तमस्यामह्नः[4] सर्वं प्रच्छादं प्रच्छादयेदपि वा त्रिंशतो ऽवकाशं कृत्वा लोकंपृणा इष्टका उपदधन्मासमेतीति । कथमेतं मासं गच्छेदितीष्टिः प्रथमाथ पूर्वाह्णिके प्रवर्ग्योपसदावथेष्टका[5] अथापराह्णिके[5] प्रवर्ग्योपसदौ मासि वसोर्धारेति । मासं पुरीषेण यन्तीति । कथमेतं मासं गच्छेदितीष्टिः प्रथमाथ[6] पूर्वाह्णिके प्रवर्ग्योपसदावथ पुरीष-मथापराह्णिके प्रवर्ग्योपसदौ । चतुरो मास उपसद्भिरे-

---

१ Instead of इतरान् some of the MSS. again इमान्;—चतुरहोनान् twice (as above) H, and one of my copies of the Vivaraṇa.

२ ? Thus (and is so to be read also supra, 308. 12 ?) M U G, चतुरश्चतुरोमासान्प्र° K, चतुरश्चतुरहोनान्मासान्प्र° Ben, चतुरश्चतुरोनान्मा-सान्प्र° Be.

३ Thus Ben H and one copy of the Viv.; चतुर the other MSS.

४ Are these words corrupt? The Vivaraṇa periphrases: त्रिंशत्तमे ऽह्नि सर्वमुपधेय शेषमुपदध्यात् ।

५ Thus according to the Viv.; °येष्टकामथाप° G, U Ben; the other MSS. are incomplete.

६ अथ om. the MSS; it is given in the Vivaraṇa.

तीति[१] । यदमुत्र[२] मासेन करोति तदिह दशरात्रेण करोति । चतुरो मासः सुनोतीति । कतमे नु खल्विमे मासा भवन्तीति । गवामयनस्य प्रथमोत्तमौ च मासौ यौ चाभितो
II. 306. 1. विषुवतः[३] सह वैषुवतेन । वसतीवरीषु मृत्पिण्डमन्ववधायेति[४] । किमर्थो नु खल्वयं मृत्पिण्डो भवतीति । संतत्यर्थ एष भवतीति । भिन्ने कुम्भे ऽन्यस्मिन्कुम्भ एतं मृत्पिण्डमन्ववधायाप[५] आनयेत्तत्पत्नीसंयाजान्तं वा हृदयशूलान्तं वाहः कृत्वा समुपनह्य राजानं काले वसतीवरीरभिगृह्याहीनसंततिं[६] कृत्वा ग्रावोवायव्यꣳ संप्रक्षाल्य द्रोणकलशे दशापवित्रे समवधायाग्नीध्रं हुत्वा समिद्धारा यन्त्याहृत्य समिध आहवनीय उपसादयन्ति । परिहृतासु वसतीवरीष्वाहृतायाꣳ सुब्रह्मण्यायाꣳ संवेशनीयाः समिधो ऽभ्याधायेध्माबर्हिः संनह्याविशिष्य[७] पयाꣳस्युपवसन्त्यथ श्वो भूते सवनेष्ट्या यजन्ते । तत्र न स्तम्बयजुर्हरति[८] । त एवमेवाहरहर्वसतीवरीः परिहरमाणाः संवत्सरꣳ सवनेष्ट्या यजन्ते । नाग्निहोत्राणि जुह्वति न दर्शपूर्णमासाभ्यां यजन्ते ।

---

१ Thus Ben and the Viv.; उपसद उपसद्भिरेतीति the other MSS.

२ Thus the Viv; यद्व्व the MSS.

३ वैषुवतोः Ben.

४ Thus Be U G H M; ०पिंडमवधाय Ben.

५ Thus Ben; the other MSS. om. अनु; Be defective.

६ Thus Be G U H; ०वरीरभिपरिगृह्या० M (sec. m.).

७ Thus M G U Be; संनह्यविशिष्य Ben H.

८ ०हरंति MSS.

ऽथ संवत्सरतम्यां[१] पर्यवेतायां परिहृतासु वसतीवरीष्वाहृतायाꣳ सुब्रह्मण्यायामहरहः संवेशनीयाः समिधो ऽभ्याधायेध्माबर्हिः संनह्य पयाꣳसि विशिष्योपवसन्त्यथ श्वो भूते[२] ऽभिजितेष्टोत्तिष्ठन्ति[२] । ॥ २७ ॥ सप्तदशः ॥

II. 306. 8. अथ वै भवति छन्दश्चितं चिन्वीत पशुकाम इत्यभ्यादानप्रभृतीन्मन्त्रान्साधयेदा[३] वायव्यात्स प्रत्यचं वायव्येन पशुना यजेत प्रत्यचं दीक्षणीययोखाप्रवृञ्जनप्रभृतीन्मन्त्रान्साधयेदा वात्सप्रविष्णुक्रमेभ्यः । प्रत्यचं वात्सप्रविष्णुक्रमैः क्रमित्वा निगदेदेवेतरान्मन्त्रान्विहरेदग्निꣳ[४] । रूपाणि[४] दर्शयेद्गच्छेदिरिणं । तत्र नैर्ऋतान्मन्त्रान्निगदेत्स[५] प्रत्यचं गार्हपत्यमुपतिष्ठेत । प्रत्यचं प्रायणीयया । प्रत्यचमातिथ्यया । कार्ष्णाजिनीप्रभृतीन्मन्त्रान्साधयेदा[६] कर्षणवपनाभ्यां । प्रत्यचं कर्षणवपने । प्रथमां

---

१ Thus emended; ॰वत्सरतस्यां Be U H, ॰वत्सरंतस्या G Ben.

२ Thus Ben and G (sec. m.); भूतेभ्योत्तिष्ठंति U, भूतेषोत्तिष्ठंति H Be, भूते इष्टोत्तिष्ठंति M.

३ Corrected; इत्यभ्यादान॰ Ben, इत्यारभ्यादान॰ the other MSS.; The Vivaraṇa details देवस्य त्वेत्यादिनाभ्यादान॰ (sic), cp. X. 2 : 2. 3.

४ Doubtful; G (sec. m.) reads as given in our text and cp. the Vivaraṇa विहरेत् चिनुयादग्निम् ; विहरेदग्निंतचरूपाणि Ben, विहरेद्ग्नींद्ररूपाणि Be, विहरेदग्नौद्रूपाणि H U, विहरेदग्नौ्रूपाणि M ; the comm. on the S'ulba cites the passage with अग्निरूपाणि ।

५ Emended; नैर्ऋतीन्मंत्रा॰ M Be G (sec. m.); नैर्ऋतिमंत्रा Ben U, नैर्ऋतिंमंत्रा॰ H.

६ Thus (कार्ष्णाजिनी॰) M Be H U (cp. X. 23 : 21. 17); ॰जिनि॰ G (sec. m.) ॰जिन॰ Ben.

चितिꣳ सपुरीषां निगदेदेवं द्वितीयामेवं तृतीयाꣳ। सर्वा[१] चितिꣳ सपुरीषाꣳ सवण्डां चितिꣳ सपुरीषां[१] निगदेद्या[२] अहान्तःशालीका[२] आकृतयः स्युर्जुहुयादेव ता। अथ य औत्तरवेदिका मन्त्राः स्युर्निगदेदेव तान्। ॥ २८ ॥

अग्निहोत्रं वै दशहोतुर्निदानं दर्शपूर्णमासौ चतुर्होतुरित्येक आनुपूर्व्यं[३] ब्रुवते। ऽथाप्युदाहरन्त्याग्न्याधेयं पूर्वस्यां ततावेकादशप्रयाजꣳ सर्वꣳ सहोत्पन्नस्तंतवः षड्ढोतेति। षाण्मास्य[४] एष पशुबन्ध उक्तो भवत्यथाप्युदाहरन्ति षट्सुषट्सु मासेष्वाहिताग्निना पशुना यष्टव्यं भवत्युभे काष्ठे अभियजेत। माघमासे[५] धनिष्ठाभिरुत्तरेणेति भानुमानर्धाश्लेषस्य श्रावणस्य दक्षिणेनोपनिवर्तत इत्येते काष्ठे भवतस्तदन्ततो ऽनीजानस्य[६]

---

१ The reading of this passage is wholly uncertain; I have accepted the reading of M (on सण्ड cp. XVII. 25 and 26); सर्वाश्चितिः सपिंडां चितिं सपुरीषां U H; सर्वाश्चितीः सपिंडां चितिं सपुरीषां G, सर्वाश्चितीः संपिंडां - - - चितेसपुरीषां Be, सर्वाश्चितीः संषसा - - चितिं सपुरीषां Ben.

२ Thus G (sec. m.), which however, as do all the other MSS. exc. U, reads °हांताःशा° instead of °हान्तःशां; निगदेदेवंद्यांतः शालिका G (pr. m), निगदेदेवंद्यास्याहांताः शालीका M., निगदेद्याहांताः शालिका H, निगदेदेवंद्याहांतः शालिका U, निगदेदेवंद्यां - - - हांताः शालीका Be, निगदेदेवंद्याभांताः शालीका Ben.

३ Thus M Ben U G (sec. m), °पूर्वं Be, अनुपूर्व्यं H G (pr. m.).

४ Thus Be U G and the Viv. (one copy); षण्मास्य M H Ben and the Viv. (another copy).

५ °मासेन Ben U (sec. m.).

६ Are we to read with the Vivaraṇa. ऽनीजानꣳ ?

II. 334. 6. संवत्सरो नातीयादथ चातुर्मास्येषु सोमेषु पञ्चहोता सप्तहोतु
स्थानं प्रत्येत्यथ य एष चातुर्मास्यसंयोजनो निर्मन्थ्य उत्सीद-
त्येष पशुसंयोजन एव[1] भवति । परिधौ पशून्नियुञ्जीतेति[2]
II. 340. 17. ब्राह्मणमेतद्यूपा एव तदस्माकं भवन्त्यथ[3] महापितृयज्ञे स्तीर्णं
बर्हिर्भवति न वेदिमालिखति न स्तम्बयजुर्हरति नाज्यानि
गृह्णीते । स यत्र तृतीयसवने धिष्णियान्विहरति तदजस्रं
मार्जालीयं करोति । महाहविर्भिश्चरित्वा समासन्नेषु हविःषु
गार्हपत्ये महापितृयज्ञहवीꣳषि श्रपयित्वा तैर्मार्जालीये प्रच-
रेदाहवनीये मारुत्या प्रचरेदन्तमेवावभृथः[4] परीयात्तस्य प्रथमा
चितिः पुरीषवती[5] मन्त्रवती भवतीति । प्रथमैवास्य चितिः
पुरीषवती मन्त्रवती भवत्यथेतरास्तूष्णीका । यांयां चितिꣳ
सपुरीषां कुवते सासैवास्य चितिः पुरीषवती मन्त्रवती भव-
त्यथेतरास्तूष्णीकाः । ॥ २९ ॥ अष्टादशः ॥
II. 343. 1, sqq. अथेम एकाहास्तेषां यान्यहान्यनादिष्टान्यग्निष्टोमा इत्येव
तानि जानीयादथाहीनरात्रिसत्त्रेषु यान्यहान्यनादिष्टान्युक्थ्या
II. 344. 12. इत्येव तानि जानीयान्माध्यंदिनीया एवैनं चमसा निम्रजन्तो

---

१ एष the MSS.

२ पशुं instead of पशून् M.

३ Thus M G U H Be; एतद्यूपा एवतस्माकं भवत्यथ Ben.

४ Thus Ben (only चरेत् instead of प्रचरेत्); चरेदंतमोवभृथः G H, चरेदंतमोवभृथः U, चरेदंतमेनावभयः Be, प्रचरेदंतमेनवावभृथः M; cp. XXVI. 25 : 308. 3.

५ सपुरीषवती MSS.

यन्तीति[१] । सदस्यासीनं माध्यंदिनीया एवैनं चमसा निम्न-
II. 344. 13. जन्तो यन्ति भक्षार्थाश्चतुर्विꣳश एष भवति । शुक्रामन्थिनोः
II. 345. 4. सꣳस्रावेणाभिषिञ्चतीति । यजमानायतन आसीनꣳ शुक्रा-
II. 345. 9. मन्थिनोः सꣳस्रावꣳ समानीयाभिषिञ्चति[२] । चतुष्टोम एष
भवति । सप्त हवीꣳषि प्रातःसवनीयाननुवर्तन्त इत्याग्नेयो
ऽष्टाकपालः पौष्णश्चरुः सावित्रो[३] द्वादशकपालस्त्वाष्ट्रो ऽष्टा-
कपालो वारुणो दशकपालो वैश्वदेवश्चरुर्मारुतः सप्तकपाल
II. 346. 4. इत्यष्टौ हवीꣳषि प्रातःसवनीयाननुवर्तन्त इत्याग्नेयो ऽष्टाकपालः
सौम्यश्चरुः सावित्रो[३] द्वादशकपालो बार्हस्पत्यश्चरुरग्नीषोमीय
एकादशकपालः सारस्वतश्चरुर्वारुणो[४] दशकपालो द्यावापृथिव्य
II. 346. 17. एककपाल इति । यत्किंच राजसूयमृते सोमं तत्सर्वं भव-
तीति । मारुतं चात्रैकविꣳशतिकपालं प्रतिषेधयत्यौपसदा-
II. 347. 14. स्वेष्टीरर्धचतुर्दशैरेष[५] मासैः संतिष्ठते । यत्किंच राजसूयमनु-
त्तरवेदीकं[६] तत्सर्वं भवतीति । द्विपशुं चात्र पशुबन्धं प्रतिषेध-
II. 348. 19. यति[७] चातुर्मास्यानि चाध्यर्धेनैष[८] मासेन संतिष्ठते । सिꣳहे

---

१ इति om. M Ben U.

२ Thus G H U Be, समवनीया° M, सवनीया° Ben.

३ The words द्वादश° unto सावित्रो (incl., l. 6) are given only by Ben, which, however, reads सावित्रो दशकपा° instead of सा° द्वादश° ।

४ Thus Ben, सावित्रश्च the other MSS.

५ Thus M Ben; °षेधयंत्यौ° Be U H, °षेधयतीत्यौ° G.

६ °वेदिकं all, but cp. T Br. II. 7. 5. 2.

७ Thus Be, °यंति the other MSS.

८ Thus G only; नाध्य° all the other MSS.

II. 350. 14. व्याघ्र उत या पृदाकाविति । किंदेवत्या उ खल्वियमाहुतिर्भवतीति । ॥ ३० ॥

II. 354. 16. इन्द्राणीदेवतेत्येव[1] ब्रूयात्सप्तदशिना पशुबन्धेनेष्ट्वोखाः संभृत्य पशुशीर्षाणि च वायव्येन पशुना यजेतापि वा पुरस्तादेव तूष्णीं[2] संभृताः[3] संभृत्य मन्त्रवतीं मृदं संभृत्य तयानु-
II. 356. 8. प्रलिप्य[4] । नियुनक्त्युक्थ्यस्योपयामगृहीतो ऽस्यग्नये त्वा बृहद्वते वयस्वत उक्थायुवे यत्ते अग्ने बृहद्वयस्तस्मै त्वा विष्णवे त्वा जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनिरग्नये त्वोक्था-
II. 358. 14. युव इति । नियुनक्ति ध्रुवस्य मूर्धानं दिवो अरतिं पृथिव्या मघवन्तमृताय जातमग्निम्[5] । कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ उपयामगृहीतो ऽसीन्द्राय त्वा मघवते जुष्टं गृह्णामीति । परिमृज्य सादयत्येष ते योनि-
II. 359. 3. रिन्द्राय त्वा मघवत इति । नियुनक्ति पात्नीवतस्योपयामगृहीतो ऽसि बृहस्पतिसुतस्य त इन्दो[6] इन्द्रियावतः पत्नीवन्तं ग्रहं गृह्णामीन्द्रा२[7] पत्नीवा३ इति । नियुनक्ति हारियोजन-

---

१ इंद्राग्नी॰ Ben.

२ तूष्णीमेव M.

३ संभृतां all, but cp. the Vivaraṇa: तूष्णीं संभृता उखा संभृत्य ।

४ Thus M, तयानुप्रपलिप्य Be, तयानूपलिप्य G (sec. m.), तयानुलिप्य Ben H U.

५ जातमिंद्रमग्निं M.

६ Thus M G U, इंद्रो the other MSS.

७ Uncertain; ॰मींद्राश्र G (sec. m.), ॰मींप्र्यार Bo, ॰मींद्राग्रार H ॰मींद्रम्यार U, ॰मीऊआग्रा - ३ Ben, ॰म्याग्रार M.

स्योपयामगृहीतो ऽसि रोहिदसि रोहिद्योजनो रोह्यो स्थाता
वज्रस्य भर्ता पृश्नेः प्रेता तस्य ते देव सोमेष्टयजुष स्तुतस्तोमस्य
शस्तोक्थस्य रोहिद्वन्तं ग्रहं गृह्णामि रोही स्थ रोह्योर्धानाः
सहसोमा अग्नये स्वाहेति। यो ऽग्निष्टुतीन्द्रस्पर्शस्तमुत्सादयेद्य
इन्द्रस्तुत्यग्निस्पर्शस्तमुत्सादयेन्नित्या अन्या देवताः। किंदेवत्यानि
II. 360. 10. खल्वतिरिक्तस्तोत्राणि भवन्तीत्याश्विनानीत्येव ब्रूयाद्यच्च[1] किंच
रात्रिमुपातिरिच्यते सर्वं तदाश्विनमितीन्न्वेकमथापरमाग्नेयं[2]
प्रथममैन्द्रं द्वितीयं वैश्वदेवं तृतीयं वैष्णवं चतुर्थमिति।

॥ ३१ ॥ एकोनविंशः ॥

II. 366. 11. स ग्रीष्मस्य जघन्याहःसु प्रजह्रितेषु[3] यवेष्विति। प्रमृदि-
II. 366. 12. तेष्वित्येवेदमुक्तं[4] भवत्यधिकरणेनेत्येवेदमुक्तं भवत्यृत्विजः[5] पदे-
II. 367. 1. नाक्रापयतीति[6] तत्पूर्वं[7] वेत्यथैनमभ्यज्य पवयित्वोदानयतीति।
सिद्धमत्राग्निष्टोमिकं कर्म जानीयादोत्तरस्मादुपघातादेत-
स्मिंस्त्र काले त्रीणि बर्हींषि यजुषा कुर्याद्दीक्षणीयायाः

---

१ ॰च्चदि M.

२ ॰मितीन्न्वेक॰, मितीचेक॰, मितिन्न्वेक॰ the MSS.

३ Thus M G (sec. m.) and the Viv. ; व्रजितेषु Be, व्रजतितेषु H U G (pr. m.), व्रजंतितेषु Ben. ; the meaning is, acc. to the Viv., प्रपक्वेषु।

४ प्रसुद्दिते॰ Ben.

५ भवतीत्यृत्विजः Ben.

६ पदंना-पयतीति Ben, पदंनाक्रायंतीति Be U, पदंनाक्षयंतीति G, पदंवा-क्रवंतीति H, पदंनासीदयतीति M, but द cancelled.

७ Conjectural reading. तत्पूर्वयत्यथे॰ Ben G (sec. m), तत्पूर्वत्यथे॰ Be H U M G (pr. m.).

प्रायणीयाया आतिथ्याया इत्यथ निर्वपेद्दीक्षणीयां प्रायणीयामातिथ्यादाज्येन[1] वर्तयेद्यावद्ध्या[2] आगच्छेयुः[2] सहनिरुप्तमाज्यं तिसृषु स्थालीषु विगृह्णीयाद्यां दीक्षणीयायै सꣳस्था[3] तया[3] दीक्षणीयाꣳ संतिष्ठापयिषेत्प्रणीताभिः प्रायणीयस्य
II. 368. 2. प्रतिपद्येतैष[4] एवातिथ्याया उपक्रमो भवतीति । त्रिवत्सेन साण्डेन वत्सतरेण राजानं क्रीत्वोह्यातिथ्यं निर्वपतीति । त्रिहायणेनेत्येवेदमुक्तं[5] भवति[6] । कथमु खल्वस्य मन्त्रानभिनमये
II. 368. 3. च्चिदसि[7] मनो[8] ऽसि[8] धीरसि दक्षिणो ऽसि यज्ञियो ऽसि क्षत्रियो ऽस्यदितिरस्युभयतःशिराः[9] स नः सुप्राङ् सुप्रत्यङ् संभवेत्येकगणा[10] उपसदो भवन्तीति । पूर्वाह्णिका एवैता उक्ता
II. 368. 13. भवन्ति । खलेवाली यूपो भवतीत्येतामेवैषां[11] मेथीं कुर्वन्ति ।

---

१ ? Thus Be U H. ०थ्यामाज्येन G, ०थ्यांपृषदाज्येन M. Ben utterly corrupt:

२ Thus the Vivaraṇa; all the MSS. are hopelessly corrupt: G has the least corrupt reading यावद्ध्यमागच्छेयुः ।

३ Thus M G U Be, संस्थाया H. संस्थान Ben.

४ Thus M G U, प्रतिपद्यद्येतैष Be Ben. प्रतिपद्येतेसषया H.

५ ०हायनेने० MSS. exc. Ben.

६ भवतीति MSS. exc. M.

७ ०भिसंनमये० G.

८ मनासि MSS. exc. H.

९ Thus Be G U Ben, ०शिरो H. ०शीर्षासि M

१० ०गुणा MSS.

११ ०त्येनमेवैषां Ben; are we to correct: ०त्येतामेवैषां (iṣa)? Viv. एतामेव चषीयामार्थं कुर्वन्ति ।

स खल्वेवाली यूपस्तस्यै कटे परमिव चषालभाजनं भवतीत्या
II. 369. 1. कुट्ट[१] इत्येवेदमुक्तं भवत्यथैतान्पशूनुपाकरोत्यग्नीषोमीयमाग्नेय
मनूबन्ध्यमिति । यमा एवैते छागाः समानयोनयो भवन्ति ।
तेषामुक्तं चरणमथास्याः सद्यस्क्रियामनुक्रियां परिक्रियामति-
क्रियामवभृथप्रभृत्यस्तमिते[२] यज्ञपुच्छं । तासां प्रथमैव सरथा[३]
प्रथमा चित्यसोमक्रयणी प्रथमाग्निहोत्रोच्छेषणव्रतोथास्याः[४]
सद्यस्क्रियामनुक्रियां परिक्रियामतिक्रियां त्रिस्तनद्विस्तनैक-
स्तनव्रतस्य[५] रूपाणि[५] कुर्वन्ति । क[६] उ[६] खल्वेकाहे दृष्टः[७]
संनिवापो भवतीति । व्रात्यस्तोमे चेन्द्राग्न्योश्च कुलाय इत्येव
II. 371. 5. ब्रूयादथास्मिन्व्रात्यस्तोमे[८] बहव एकस्मै दीचन्ते[९] । ऽदीचिता[१०]
II. 373. 8. एवैनान्याजयन्ति[१०] । दण्डोपानहः[११] ग्रामुलाजिनमिति । ग्रा-

---

१ Thus G M Ben, ०कट्ट U H, ०क्रट्ट Be; the Viv. reads चाकुट and details: चाहतस्थानं निम्नक्षतम्।

२ Instead of अतिक्रियाम् here and l. 7 the MSS. read अभि०, अवि० or इति०।

३ Thus corrected; सरथा: Be M G, सुरथा: H U, सपथा: Ben.

४ Corrected; ०षणव्र(इ)तोमंथास्यां M G U Be, ०षणवततमथास्यां H Ben.

५ Corrected; ०कस्तनव्रतरूपाणि Ben H, ०कष्टतस्य रू० M Be G U.

६ Thus M G Be U, कउ H क Ben.

७ दृष्टी: Ben, दृष्टं Be.

८ Thus M Ben, ०थैतस्मिन्व्रा० the other MSS.

९ Thus M G; दीचते Be U H, एकस्मिन्नदीचंते Ben.

१० दीचित ... जयति H.

११ ? दंडोपानहनं G (sec. m.) Ben. दंडोपहननं G (sec. m.), दंडोमन-हनं Be, दंडोपनहन H, दंडोपिगहनं M

मुलकानामु[१]ह दर्भमिश्राः[२] कम्बला भवन्ति स च भवति[३]
श्वेत[४] चौरश्वाजिनम्[५] । ॥ ३२ ॥

II. 374.3. 4. स एष[६] ज्येष्ठानामग्निष्टोम । एष एव मन्कनीयसामुक्थ्य-
II. 386. 6. श्चतुष्टोमं पूर्वमहर्भवति पञ्चस्तोममुत्तरꣳ[७] । रथो[७] हविर्धानं ।
II. 386. 8. कुर्यात्तन्यरूपमुत्तरं हविर्धानमुत्सोदेयुः शकटमन्त्वा । द्वौ त्रय-
स्त्रिꣳशौ मध्यत स्तोमौ भवत इति । पृष्ठ्यस्तोमावेवैताववित-
श्चामुतश्च[८] प्रतिलोमौ[८] भवतो । ऽथामावास्यायां[९] प्रतिममस्य
II. 383. 10 चान्द्रमसं पिण्डपितृयज्ञं दद्यात्तं ब्रह्मणः सन्तं पर्युपविश्य
भक्षयन्ति यद्धृतं मन्यन्ते तेन ब्राह्मणं । ब्राह्मणो वै वर्णानाꣳ
श्रेष्ठो[१०] ऽग्निर्देवानामित्येतेन वा भक्षयेदपि वा व्याहृतीभि-
II. 383. 12. श्चतुष्टोम एष भवतीति[११] चतुरुत्तरीय[१२] एष[१३] दिशां चतु-

---

१ Thus M Be and Viv.; मामुलाका॰ the other MSS.

२ Corrected according to the Viv., दर्भमिश्रा M G (sec. m.), दर्भमि Ben, गर्दभमिश्रा Be U H.

३ भवंति MSS.

४ श्वेतां MSS.

५ चोर॰ Ben (च चौरश-चाजिनम्) ।

६ एष Ben and Viv. ; एव the other MSS.

७ Thus M only ; ॰मुत्तरमथो the other MSS.

८ Thus M G (sec. m.) Be Ben ; ॰तश्चाप्रति॰ U H G (pr. m.).

९ Refers acc. to the Vivaraṇa to the सुरम (XVIII, 37).

१० Thus M Ben, ज्येष्ठो G U Be H.

११ Ben om. इति, rightly ?

१२ Corrected ; ॰तरीयादेव M G U Be, ॰तरीयादय H. ॰तरायावदय Ben.

II 392. 6. ष्टोमो भवत्यथास्मिन्कानान्धयज्ञे[१] ऽवभृथप्रभृत्यस्तमिते यज्ञ-
II. 395 8. पुच्छं । तस्य दशसु वहिष्पवमानः शते सहस्रे ऽयुते नियुते प्रयुते[२]
ऽर्बुदे न्यर्बुदे समुद्रे मध्ये ऽन्ते परार्धे पद्वे[३] पल्वे नित्यमुक्ता[४]
मनसैव स्तुवानो मन्यत एतावति[५] मे[५] स्तुतमित्यथ सकृत्प्रवर्ग्ये
II. 405. 18. एकमेवाग्निहोत्रमथास्मिञ्छुनस्कर्णयज्ञे । तिलमिश्रमशित्वा म-
त्याग्खादित्वा[६] चारमाचं[७] पिबेदथ सामपथे संविशेत्स्वप्नादेव
II. 406. 8. स्वप्ने गच्छति । राशिकृतं[८] धान्यं ददाति सरायकृतं धान्यं
II. 407. 4 ददातीति । मूतकृतमित्येवेदमुक्तं भवति । प्रचरन्ति प्राञ्चः
प्रत्यञ्चः प्रचरन्तीति । यः प्रत्यङ् विहारो दक्षिणतउपचार
एष भवत्येतेनैवापि सर्वतोमुखो व्याख्यात । एतेन सहस्र-
शालो । ऽथैनमिह[९] पवयित्वामुत्र पवयन्तीति[१०] । सिद्धमत्रा-

---

१ कानांड॰ (or कानांद्ग॰ ?) M.

२ Om. G U.

३ पद्वे G U Ben and probably also M ; पद्ये Be, द्वे H ; are we to correct here and XVIII. 43. बद्वे ?

४ Thus Ben ; नित्यमुक्या the other MSS.

५ Thus M G U ; एतावतिमेव H, एतावतीमे Be, एतावतीमेव Ben.

६ ·खादित्वा H.

७ Thus G U ; ॰माच M, चारमाच H, चरमच Ben, मचारमाचं Be.

८ राशी॰ G Be U H.

९ Conjectural reading ; वैनमिह MSS (वैरनङ्ह M). I have not been able to point out the passage in the text proper here referred to.

१० ॰यन्तीति G (sec. m.) Be.

II. 412. 4. ग्निष्टोमिकं कर्म जानीयादुत्तरस्यैव[१] शालायै स द्वौ त्रिरात्रौ[२] कुरुत एकं च द्विरात्रमिति[३] । दीक्षोपसद्भिरेवास्यैतान्यहान्यभिविधत्त ऽ[४]हीनविधो ऽति यज्ञं दद्यात्तदिदं[४] प्रोक्तं यदकॢप्तꣳ सूत्रतः । सामयिकं त्वेव क्रतुयोग[५] यज्ञे यज्ञमुपलक्षये-
५ तेति बौधायनो यज्ञे यज्ञमुपलक्षयेतेति बौधायनः ॥ ३३ ॥ विꣳशः ॥

॥ इति षड्विꣳशः प्रश्नः ॥

। कर्मान्तꣳ समाप्तम् ।

---

१ Thus the MSS.; read ॰दुत्तरस्यै च ?

२ द्विरात्रौ G U.

३ त्रिरा॰ MSS. exc. M.

४...४ Wholly uncertain; ॰हीनविधोतियज्ञदद्यात्तदिदं G, हीनविधोतियज्ञं दद्यात्तदिदं U, हीनविधोतियज्ञदद्यात्तदिदं Ben Be, हीनविधोतियज्ञं दद्यात्तदं H, हीनविधोनियज्ञं दद्यात्तिदिदं M. The Viv. seems to point, at least also to the reading यज्ञं दद्यात् ।

५ Thus M G U H, क्रतुयेयंगं Be, क्रतुयेयंग Ben

प्रायश्चित्तसूत्रम् ॥

अथातो मन्त्रगणाम्नातानि प्रायश्चित्तानि व्याख्यास्यामः । सर्वत्रोपरिष्टान्मन्त्रकृतं यद्यधस्तान्निपतेद्ब्रह्म प्रतिष्ठा मनस इत्येतया प्रतिष्ठाप्यैतयैव स्रुवाहुतिं जुहुयाद्धुत्वा वा[1] प्रतिष्ठापयेद्धुत्वानन्तरं[2] कर्म कुर्यादेवमन्येष्वप्यतिक्रान्तं कर्म नाद्रियेत यद्यर्थलुप्तं भवति । सर्वत्राश्रावितप्रत्याश्रावितवषट्काराणामत्युक्तानुक्तहीनेष्वाश्रावितमत्याश्रावितमित्येतया स्रुवाहुतिं जुहुयात्सर्वत्र देवोच्चारणेषु[3] भागिनीं देवतामनुच्चारयित्वा[4] योन्यामुच्चारयेद्यद्वो देवा अतिपादयानीत्येतया स्रुवाहुतिं जुहुयात्सर्वत्र देवतावाहनेषु भागिनीं देवतामनावाहयित्वा योन्यामावाहयेदेतयैव स्रुवाहुतिं जुहुयाद्यत्र स्मरेत्तदुपोत्थायैनां मनसावाहयेदथातिरिक्तामाज्येन यथोढां यजेत । सर्वत्र प्रणीतानां प्रणीयमानानां प्रणीतानां[5] वा यदि[6] विप्रुषो[6] विपतेयुः[6] सवेदा चमस[7] आपो[7] हि ष्ठा मयोभुव इति तिसृभिरद्भिः पूरयित्वा ततं म आपस्तदु तायते पुनरित्ये-

---

१ Om. H.

२ Thus H U C′ B Viv., °ड्वावानन्तरं Tr.

३ Thus H U B, देवतोच्चरणेषु C′, °च्चारणे Tr.

४ देवतामुच्चा° B.

५ प्रणिच्छितानां H B.

६ Thus Tr., विप्रुषो यदि पतेयुः the other MSS.

७ Thus C′ H, चमसं आपो U, चमसमापो B, चमसामापो Tr.

तया स्रुवाहुतिं जुहुयात्सर्वं च वितते यज्ञकर्मणि यदि सूर्यो नाविर्भवत्यन्यत्रादेशाद्‌दृश्यं[१] तमसस्पर्युद्‌ त्यं चित्रमित्येताभिः स्रुवाहुतीर्जुहुयाद्यदि सूर्याचन्द्रमसोर्ग्रहणं[२] विद्यत एतदेवाथ यति यजमानस्यर्त्विजां वा स्वप्ने रेतोविसर्गः स्यादिमं मे वरुण तत्त्वा यामीत्येताभ्याꣳ स्रुवाहुती जुहुयात्सर्वं च[३] हविर्देवतायाज्यापुरोनुवाक्याहुतीनाꣳ कृताकृतशेषेष्वन्तरिते विपर्यासे च त्वं नो अग्ने स त्वं नो अग्न इत्येताभ्याꣳ स्रुवाहुती जुहुयात्सर्वं च दर्विकूर्चप्रस्तरपरिधिबर्हिर्विधृतिपवित्रवेदोपवेषेध्मद्रव्यसंभाराणां[४] छेददाहोपघातेषु नाशे विनाशे वान्यं यथालिङ्गं कृत्वा यथालिङ्गमुपसाद्य त्वमग्ने अयासि प्रजापत इत्येताभ्याꣳ स्रुवाहुती जुहुयात्सर्वं च वितते यज्ञकर्मणि ॥ १ ॥

यदि पुरा प्रजाजेभ्यो बहिःपरिध्यङ्गारा अभिपर्यावर्तेरन्ब्राह्मणोक्तं प्रायश्चित्तं कृत्वेमं जीवेभ्यः परिधिं दधामीत्येतया स्रुवाहुतिं जुहुयात्सर्वं च वितते यज्ञकर्मणि यदि यज्ञभ्रेष आगच्छेदिष्टेभ्यः स्वाहा[५] वषडनिष्टेभ्यः[५] स्वाहेत्येतैरष्टाभिः[६] स्रुवाहुतीर्जुहुयात्सर्वं च वितते यज्ञकर्मणि यदि जन्यं भयमा-

---

१ Thus U C′ Tr Viv.; ॰न्यत्रदेशा॰ B, न्यत्रादशा॰ H.

२ Thus C′ U Viv.; सूर्याचन्द्रमसोर्ग॰ B, ॰सूर्याचंद्रमसोग॰ Tr H.

३ B U ins. वितते यज्ञकर्मणि।

४ दर्वि॰ Tr C′ U Viv., दर्वी॰ B H and Prāy. candrika.—Instead of ॰वेदोपवेषेध्म॰ Tr B read ॰वेदेध्मोपवेष॰।

५ Om. Tr.

६ ॰त्यष्टभिः C′, ॰त्येताभिः Tr

गच्छेद्युत इन्द्र भयामहे स्वस्तिदा विशस्पतिरित्येताभ्याꣳ स्रुवाहुती जुहुयादभये वा पुनर्यजेत । [१]सर्वत्रोपाꣳशुप्रभृति वाच[२] स्थानानाꣳ स्वराक्षरपदवृत्तभ्रेषेष्वाभिर्गीर्भिर्यदतो न ऊनमित्येतया स्रुवाहुतिं जुहुयात्सर्वत्रानाज्ञातप्रायश्चित्तेष्वनाज्ञातं पुरुषसंमित इत्येताभ्याꣳ स्रुवाहुती जुहुयात्सर्वत्रेध्माबर्हिषः प्रयाजानूयाजानां[३] पाकत्राकर्मसु[४] यत्पाकत्रा मनसेत्येतया स्रुवाहुतिं जुहुयात्सर्वत्र स्कन्ने भिन्ने छिन्ने भग्ने[५] नष्टे[५] क्षामे विपर्यास उद्दाहे[६] ऊनातिरिक्ते वा[७] यन्म आत्मनो मिन्दाभूत्पुनरग्निश्चक्षुरदादित्येताभ्याꣳ स्रुवाहुती जुहुयात्सर्वेष्वग्न्युपघातेषु पुनस्त्वादित्या रुद्रा वसवः समिन्धतामित्येतया समिधमादध्यादेतयैव स्रुवाहुतिं जुहुयात्सर्वेषु यज्ञक्रतुषु पत्नीः संयाज्य प्राङेत्य ध्रुवामाप्याय्य ध्रुवातः सर्वप्रायश्चित्तानि जुहोति ब्रह्म प्रतिष्ठा मनस इत्येतेनानुवाकेन प्रत्यृचमथ वै भवति समिष्टयजूꣳषि जुहोति यज्ञस्य समिष्ट्यै । यद्वै यज्ञस्य क्रूरं यद्विलिष्टं यदत्येति यन्नात्येति यदतिकरोति यन्नापिकरोति

---

१ In H U the prāyaścitta सर्वत्रेध्माबर्हिषः (l. 5) is given here, but cp. T. Br. III. 7. 11. 5.

२ वाचि U, वाचि H.

३ ॰नुयाजा॰ H Tr.

४ पाकत्रकर्मसु B Tr.

५ Om. Tr. B; the last om. also भिन्ने छिन्ने ।

६ ? उद्दाहे Tr, वुद्दाहो H, उद्दाहे B U, विपर्यासेदूरदाहे C′; the Viv. explains as उत्सेचने ।

७ Om. Tr.

तदेव तैः प्रीणातीति ब्राह्मणमेतान्येव ब्राह्मणविधिविहितान्याप्यायनानि[१] मन्त्रवन्ति[२] भवन्तीति बौधायनो । मन्त्रगणाम्नातानि नैमित्तिकानीति शालीकिः । ॥ २ ॥ प्रथमः ॥

अथ कपालकरणे रथचक्रचित्याहत्यश्वशफमात्रꣳ स्थानं कल्पितं भवति । संकल्पो[३] ऽधिकारः कपालवृद्धिः कपालह्रासो वा कपालानामनभिप्रथने व्याहृतीभिराहवनीये स्रुवाहुतीर्जुहुयाद्भूर्भुवः सुवरित्येतावदेव नानाप्रथने चातिप्रथने चाथ हविषामभ्युत्पन्द्रवदाहोत्सेकनिस्रावे[४] प्रायश्चित्तिर्भूते रुद्राय स्वाहेत्याहवनीये[५] स्रुवाहुतिं जुहुयाद्वे वायवे विदग्धे निर्ऋत्यै । यदि दग्धꣳ स्याद्यत्तच[६] भूतꣳ स्यात्तेन[७] प्रचरेदथ यदि सर्वमेव दग्धꣳ स्यादपो ऽभ्यवहृत्य मिन्दाहुती जुहुयादथान्यं निर्वपेदाज्येन वा प्रचरेत्सैव ततः प्रायश्चित्तिर्यस्यैयस्यै[८] दिश्युल्लिप्येत तस्यैतस्यै देवतायै स्रुवाहुतिं जुहुयाद्यदि प्रागग्नये यदि दक्षिणतो यमाय यदि पश्चाद्वरुणाय यद्युत्तरतः

---

१ U ins. sec. m. नित्यानि. B ins. प्रायश्चित्तानि नित्यानि ।

२ मंत्रवर्णवंति B and U (sec. om.)

३ संकल्पे B.

४ ०स्रावेषु Tr.

५ आहवनीये om Tr. B.

६ Thus C' Tr. and Viv., स्यात्तच H. स्याद्यद्यच B U.

७ चाथ Tr. ins. after स्यात् ।

८ Thus also the Vivarana.

सोमायाथ[१] यदि सर्वत एवोत्सिच्येतैताभ्यः सर्वाभ्यो देवताभ्यः स्रुवाहुतीर्जुहुयात्तमाज्येनाप्यायनीभ्यामाप्याययत्याप्यायस्व सं त इत्यथ हविषामुद्वासनकाले पतनफालनखण्डनोद्वर्तनसंसर्पणविपरीतव्यवायकरणेषु[२] [३]व्याहृतीभिराहवनीये स्रुवाहुतीर्जुहुयाद्भूर्भुवः सुवरित्यथान्तरेण वेद्युत्करावुदङुपनिक्रम्य तमितोऽदङुपनिःसृप्य[४] व्याहृतीरुक्त्वा व्याहृतीभिरेव प्रतिपद्यते[५]। ॥ ३ ॥

व्याहृतयस्तु[६] चतुष्पादा नवांशाश्च षडक्षराः।
चतुर्णामपि वेदानामादिमध्यावसानिकाः[७] ॥
मन्त्रोनं वातिरिक्तं वा दुरिष्टं वापि यद्भवेत्।
व्यपोहयन्ति[८] पाप्मानं तस्माद्व्याहृतयः स्मृता इति ॥

यद्यृक्तो यज्ञभ्रेष आगच्छेद्भूरिति गार्हपत्ये जुहुयाद्यदि यजुष्टो भुव इत्यन्वाहार्यपचने। यदि सामतः सुवरित्याहवनीये। यदि सर्वतः सर्वा जुहुयाद्।

---

१ अथ om. B U.

२ Instead of ०फलन० B: कालन०।— Before संसर्पण० B U have वलनवेपन०।

३ Before व्या० A B ins. प्रायश्चित्तं, C′ प्रायश्चित्तिर्।

४ Thus U C′, ०परिसृप्य H (pr. m.), ०पसृप्य Tr H (sec. m.), संसृप्य B.

५ ०पद्यते Tr H, ०पद्येते B U C′ (प्रविशेत् the Viv.)

६ व्याहृतीस्तु U only.

७ ०सानकाः H U.

८ Thus H U B C′, पोहति च Tr.

उद्धृते तु पुरोडाशे वेपिते स्यन्दिते[१] तथा ।
भिन्ने सꣳसर्पणे चापि[२] प्रायश्चित्तं कथं भवेदिति ॥

विज्ञायते

उद्धृते तु[३] कुलꣳ हन्याद्वेपिते नश्यति प्रजा[४] ।
भिन्ने सꣳसर्पणे चापि यजमानः प्रमीयत इति ॥

अथ[५] पतनफालनखण्डनोद्वर्तनसꣳसर्पणेषु[६] प्रसिद्धमुद्रास्य बर्हिषदं कृत्वा प्रभूतेन सर्पिषावसिच्याभिमन्त्रयते किमुत्पतसि किमुत्प्रोष्ठाः शान्तः शान्तेरिहागहि[७] । अघोरो यज्ञियो भूत्वासीद सदनꣳ स्वमासीद सदनꣳ स्वमिति । ब्रह्मणे वरं दत्त्वान्तर्वेद्यासादयेत्तस्याꣳ सꣳस्थितायाꣳ सुरभिमतीं निर्वपेत्तस्याꣳ सꣳस्थितायां तन्तुमतीं निर्वपेद् ।

आयुष्मत्यस्तु कर्तव्या उत्तराश्छन्दसः[८] क्रियाः ।
हविर्भ्रेषविधिस्त्वेष[९] विहितस्तत्त्वदर्शिभिरिति ॥

---

१ स्यंदिशे Tr. C′.

२ वापि U.

३ Thus C′ U Tr, नु H, B om.

४ प्रजाः U C′.

५ Instead of अथ Tr ब्राह्मणम् ।

६ B again •कालन• instead of •फालन• ।

७ शांतेरि• Tr.

८ ? Thus U Viv. (sec. m.), •राःछंदसः H, •राश्छांदसः C′, •राछंदसः Viv. (pr. m.) Tr B.

९ हविर्भेष• Tr.

स्कन्ने ग्रहणनिर्वापे[१] द्रव्याणां चानुमन्त्रणे ।
यस्मिन्काले विजानीयात्तत्कुर्यात्कर्मसꣳस्तरे[२] ॥
प्रणवो व्याहृतयश्चैव[३] यज्ञ एष परोऽवरः ।
तस्माद्यज्ञस्य यत्स्कन्नं विपरीतं च यद्भवेत् ।
तत्सर्वं व्याहृतीभिः[४] कुर्यादन्यच्च च वषट्कृतात् ॥
अजानद्भिः कृतं यच्च त्वरमाणैश्च यत्कृतम् ।
व्याहृतीनां प्रयोगेण यत्कृतं कृतमेव तदिति ।
कपालानां प्रमाणानि ब्रूयादाध्वर्यवे विधौ ।
समानि चतुरश्राणि द्व्यङ्गुलानि समन्ततः ॥

हविर्विकाराणां प्रमाणेन समविषमाणि[५] वर्धयन्तीति[६] बौधायनः ॥ ४ ॥ द्वितीयः ॥

अथारणिगतानामात्मगतानामजस्राणामन्वाहितानाꣳ[७] सवनगतानां चाग्नीनामुद्वातानां[८] प्रायश्चित्तिररणिगतं मथित्वा विहारं कल्पयित्वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतु-

---

१ ग्रहणंनि॰ Tr.

२ ? Thus Tr B, सꣳस्मरेत् C′, संचरेत U H

३ Thus H Tr C′, °हृतिश्च B U.

४ Thus Tr, ॰तिभिः H C′ U (pr. m.), ॰हृतिः B, ॰हृति U (sec. m.)

५ च ins. Tr B U (sec. m.).

६ Thus Tr U (sec. m.), वर्धयतीति B, वर्धयेदिति C′ H U: the Vivarāṇa periphrases छेदयन्ति ।

७ अजस्राणाम् om. Tr.

८ वाग्नी॰ U H.

गृहीतं गृहीत्वाहवनीये संततीं[1] जुहोति मनो ज्योतिर्जुषता-माज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु । या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहेत्येतत्प्रायश्चित्त-मनुगते ऽकृते ऽभ्युदिते ऽभिनिम्रुक्ते चैतत्परिवित्तस्यैतत्परि-विन्नस्यैतत्परिविविदानस्यैतत्सोमवामिने[2] सोमातिपवितायं[3] भवान्तरितस्यैतद्ब्रह्मचरहितस्यैतत्परोष्टस्यैतत्परियष्टुरेतदेव यस्य पुरुषो रथो ऽश्वो गौर्महिषो वराहो ऽहिर्मृगः श्वा वान्यद्वा श्वापदमन्तराग्नीन्गच्छेदेतदेव[4] [5]यस्याग्नेरेकदेशमपहरेयुरेतदेव सर्वास्वेवाग्निहोत्रस्यार्तिषु मनस्वत्या प्रायश्चित्तिः क्रियत इष्टा वसीयान्भवतीति ब्राह्मणम् ॥ ५ ॥ तृतीयः ॥

अथ दर्शपूर्णमासयोश्चत्वार ऋत्विजस्तेषामेकस्मिन्नविद्यमाने त्रयः प्रचरेयुर्द्वौ वाथ[6] यद्येक एव स्यात्पुरा प्रयाजेभ्य आज्य-स्थाल्याः स्रुवेणोपघातमेकाध्वर्यवप्रायश्चित्तानि जुहोति जुष्टो वाचो भूयासं जुष्टो वाचस्पतये देवि वाक् । यद्वाचो मधुमत्त-

---

१ Thus Tr, संततिं C′, संतति B U, संतत्ति H.

२ Thus (and cp. Āp. IX. 12. 11) B; after परिविन्नस्यैतत् Tr H C′ U ins. परिविदानस्यैतत्; Tr reads instead of परिविविदान॰ परिविदान॰ ।

३ ॰पवितस्यैतत् U C′.

४ After गच्छेत् H C′ and U ins. the following passage (which however, is put between brackets in U): एतदेव विण्मूत्र (H. C′ विष्ठामूत्र) पुरीषलोहितरेतोमांसास्थिमज्जामेध्याभ्याधाने समारोप्य मथित्वा पवमानेष्टिर (॰नेष्टिस्सह U).

५ Before यस्य B U H C′ ins. अथ ।

६ अथ found only in Tr C′ and the Vivaraṇa.

स्मिन्मा धाः सरस्वत्यै स्वाहा ॥ इमामेवाश्विना यज्ञस्य यद्वाचो यद्दुरिष्टम् । तदश्विनौ भेषजेन संदधाताꣳ[1] स्वाहा ॥ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् । हुवे नु शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः स्वाहा । यन्मे मनसश्छिद्रं यद्वाचो यच्च मे हृदः । देवास्तच्छमयन्तु सर्वꣳ सोमो बृहस्पतिश्च स्वाहा ॥ यद्विद्वाꣳसो यदविद्वाꣳसो मुग्धाः कुर्वन्त्यृत्विजः । अग्निर्मा तस्मादेनसः श्रद्धा देवी च मुञ्चताꣳ स्वाहा ॥ यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिꣳसिम । अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि चकृम करोतु मामनेहसꣳ स्वाहा ॥ ब्रह्मत्वे हौत्र आध्वर्यव आग्नीध्रे याजमाने[2] चैक एव यज्ञे यत्पर्याणि[2] तन्मे[3] देवा रक्षन्तां प्राणान्मे मा हिꣳसिषुः स्वाहा ॥ अहं ब्रह्माहꣳ होताहमध्वर्युरहमाग्नीध्रो ऽहं यजमान एक एव यज्ञे पर्याणि[3] तन्मे[2] देवा रक्षन्तां प्राणान्मे मा हिꣳसिषुः स्वाहेत्यैकाध्वर्यवप्रायश्चित्तानि हुत्वान्तर्वेद्यासीनः सर्वा देवता यजतीति विज्ञायते ।

अतिक्रान्तेषु होमेषु पर्वस्वाग्रयणेषु च ।
अरण्योर्ध्रियमाणेषु कथं तन्त्रं न लुप्यते ॥

---

१ Thus H C′, संधातारौ Tr, संदधातारौ B U.

२ Om. H C Tr.

३ Thus Tr B; पर्वणितंमे or तन्मं C′ H U. I take पर्याणि as standing for परियाणि, 1st conj. praes. cp. व्यपर्याणि ।

शुचिश्च पावमानी च तन्तुमानथ पाथिकृत् ।
एता इष्टयः[1] प्रयोक्तव्यास्ततस्तन्त्वं[1] न लुप्यते ॥
शुचिः शोधयते पापं तन्तुस्तन्त्वं न लोपयेत् ।

पथिकृत्यन्यानमारोहेत्[2] पावमानी तु पावयेदिति नु[3] बौधायनस्य कल्पो । दर्शे व्यतीते पाथिकृती कार्या पौर्णमासे व्यतीते वैश्वानरी कार्योभये व्यतीत उभे[4] कार्ये बहुषु व्यतीतेष्वन्वारम्भणीया[5] स्यादिति[6] शालीकिः । ॥ ६ ॥ चतुर्थः ॥

अथ यद्यरणी जीर्णे स्यातां जन्तुभिर्मन्थनेन वा समाने नवे अन्ये अरणी आहृत्यामावास्यायामुपोष्य[7] श्वो भूते दार्शेनेष्ट्वा तस्मिञ्जीर्णे शकलीकृत्य गार्हपत्ये प्रक्षिप्य प्रज्वाल्य दक्षिणेनोत्तरारणिमादाय[8] सव्येनाधरारणिमुपर्यग्नौ धारयन्नपत्युद्बुध्यस्वाग्ने प्रविशस्व योनिमन्यां देवयज्यां वोढवे जातवेदः । अरण्या अरणिमनुसंक्रमस्व जीर्णां तनुमजीर्णया निर्णुदस्वेत्ययं[9] ते योनिरृत्विय इत्यरण्योरग्नीन्समारोह्य[10] मन्थन-

१ इष्टीः प्रयुञ्जीत तत॰ Tr.
२ Thus Tr, ॰त्यंथानारोहेत् C′, ॰त्यथानमारोहेत् B, ॰न्यानमारोहयेत् H U.
३ नु given by U C′ only.
४ उभये B U.
५ ॰भणी Tr.
६ कार्येति U.
७ ॰मावास्यायामुपोष्य om. Tr B.
८ ॰रणीमादाय H.
९ निर्णु॰ Tr; after ॰दस्वेति H U C′ ins. अथ ।
१० ॰ग्निं instead of ॰ग्नीन् B; ॰रोप्य Tr B.

स्यावृता गार्हपत्यं[१] मथित्वा[१] विहारं कल्पयित्वा गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये संतनीं[२] जुहोति मनो[३] ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु। या इष्टा उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन स्वाहेत्यथाग्नये तन्तुमते पुरोडाशमष्टाकपालं निर्वपति। शरावं[४] दक्षिणां ददाति। सा प्रसिद्धेष्टिः संतिष्ठते। ॥ ७ ॥ पञ्चमः ॥

अथारण्योर्व्यापत्तिं[५] व्याख्यास्यामोऽष्टाभिर्निमित्तैर्विनश्यत्यमेध्यश्वचाण्डालशूद्रवायसपतितरासभरजस्वलाभिश्च[६] सꣳस्पर्शनेऽरण्योर्विनाशस्तयोरुत्सृज्य[७] समाने नवे अन्ये[८] अरणी आहृत्याग्निसहमग्न्याधेयमरणिगतं[९] पुनराधेयं नष्टारणी अप्सु निमज्जति[१०] भवतं नः समनसावित्यथोत्तरां छित्त्वा भित्त्वा

---

१ Tr om. गा॰ म॰, B om. गा॰।

२ Thus Tr B U, संततिं H C′.

३ All the MSS. abbreviate the mantra.

४ Thus Tr C′ H and the prāy. candrikā; शारावं B U.

५ अथातोरण्यो॰ H U C′;— ॰र्व्यापत्तौ॰ Tr.

६ दृभि॰ instead of ष्टाभि॰ Tr B U.— ॰चण्डाल॰ Tr.

७ ? Thus (°स्तयोरु°) Tr C′ and the Viv., °प्रायोरु° H, °स्तायोरु° B U.

८ Om. H U.

९ ? ॰सह॰ Tr C′ H B and the Viv., ॰गत॰ U— ॰माग्न्या॰ Tr.— ॰रणिगतं Tr and the Viv., ॰रणीगतं C′ H U ॰रणगतं B.

१० निमज्जति B C′, निमज्ज्य Tr H B and the Viv.

शकलीकृत्य मन्थनसामर्थ्यं समारोपणसामर्थ्यं मन्थनशेषं वा प्रमन्थनं[1] च कुर्यात्समस्तशल्यवर्जं । संतिष्ठते ऽरण्योर्व्यापत्तिः । ॥ ८ ॥ षष्ठः ॥

अथ हविर्दोषान्व्याख्यास्यामो यद्येतन्नीलमक्षिकाशातिका[2] मत्कुणश्चैलशिरसोर्यूके[3] कीटो वा पिण्डकारी स्यात्क्षुद्रकीट-मक्षिकापिपीलिकावर्जं श्वमार्जारनकुलकुक्कुटमर्कटध्वाङ्क्षाखु-पुरीषसिकृपदकेशश्मश्रुनखकुनखपूतिद्रप्सस्वेदासृक्श्लेष्माश्रुकासच-वध्वार्द्रव्रणैर्वोपहतमन्यैर्वोपहतं[4] रजस्वलया वा स्पृष्टं तथाप्रय-तेन[5] भ्रूणघ्नेन वा दृष्टं तथापपात्रेणामेध्ये वा देशे । स्कन्नं दुष्टं हविरपो ऽभ्यवहरन्ति । शीते[6] भस्मनि वा निधापयति[7] । भिन्दाहुती कृत्वाथान्यन्निर्वपेदाज्येन[8] वा प्रचरेदपि[9] तु[10]

१ Thus B H and the Viv.; प्रथनं U C′, प्रमंथं Tr.

२ Thus (॰शातिका i. e. आशातिका according to the Viv.), B and the Viv., ॰शांतिका H C′. ॰शीतिका U.; Tr om.

३ Thus (॰चैल॰) U H C′ and the Viv., ॰चेल B, ॰चेल॰ Tr.

४ ॰चवध्वा॰ my conjecture; ॰चवध्वा॰ Tr, ॰चवधा॰ H, ॰स्वबध्वा॰ U, ॰स्वबधा C′, ॰वर्ध्वा॰ B.; the Viv.: चवधुः चुतं ।

५ ॰प्रपतेन H; अप्रयतो नामाशुचिः the Viv.

६ शीत Tr C′.

७ ॰यंति Tr H U.

८ ॰थान्यग्नि॰ Tr, ॰थान्यनि॰ B, ॰थान्यंनि॰ C′ U, ॰थान्यंनि॰ H.

९ After प्रचरेत् H U C′ ins. नैव तत्र प्रायश्चित्तिर् ।

१० Thus Tr C′ Viv. (sec. m.), नु H U B Viv. (pr. m.).

खलु त्रिप्रसंस्कारमाज्यं[1] ब्रुवत इति । मिन्दाहुती हुत्वा मनस्वतीं जुहोति । सैव ततः[2] प्रायश्चित्तिः[3] । ॥ ९ ॥ सप्तमः ॥

अथातो ऽग्नीनामुद्वातानां प्रायश्चित्तिराहुतयः सᳲस्कारार्था दृष्टा भवन्ति । चतुर्होतार इत्येके । व्याहृतय इत्येके । मिन्दाहुती इत्येके । मनस्वतीत्येके । महाव्याहृतय[4] इत्येके[4] । ऽथ यदि सर्व एवोद्वायेयुरायतनेभ्यो ऽरण्योरग्नीन्समारोह्य[5] मन्थनस्यावृता गार्हपत्यं मन्थतीतः प्रथमं जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः । स गायत्रिया[6] त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति । छन्दोभिरेवैनᳲ स्वाद्योनेः प्रजनयतीति ब्राह्मणमथ[7] यदि मथ्यमानो न जायेत यत्रान्यं पश्येत्तत आहृत्य होतव्यमित्यथान्यमत्वरमाणः[8] पुनर्मन्थेदथ यदि जात एवोद्वायेत्समारोपणमन्त्रं जपित्वा पुनरेव मन्थेदथैनमुप-

---

१ ०संस्कारतमसा० U (pr. m.) Viv. (sec. m.), ०सᳲस्कारतमा० C′.

२ ततः Tr, तत U B H C′.

३ H U C′ add इति विज्ञायते ।

४ Om. Tr C′.

५ ०रोप्य B U H.

६ गायत्र्या MSS.

७ After ब्राह्मणम् H C′ insert the passage (l. 11-12): अथ यदि... पुनरेव मन्थेत् ।

८ Instead of the words: अथान्यमत्वरमाणः ... पुनरेव मन्थेत् (l. 11-12) H C′ have (and cp. Rudradatta on Āp. IX. 2, 3): लौकिकमग्निमाहृत्य विहृत्याग्नीनन्तरारणी निधाय जुहुयात्पुनरेवात्वरमाणो मथ्येदुक्तं मन्थनम्; these last two words not in C′.

तिष्ठत इषे रय्यै रमस्व सहसे द्युम्नायोर्जे ऽपत्यायेत्यथैनमुपसमिन्द्धे सारस्वतौ त्वोत्सौ समिन्धाताꣳ सम्राडसि विराडसीत्यथैनमुपसमाधायान्वाहार्यपचनमाहृत्य ज्वलन्तमाहवनीयमुद्धृत्य न्युप्योपसमाधाय[1] गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा दशहोतारं मनसानुद्रुत्याहवनीये जुहोत्यन्वारब्धे यजमाने स्वाहेत्यथ प्रदक्षिणमावृत्य प्रत्यङ्ङाद्रुत्य[2] गार्हपत्ये दशात्मकं ब्राह्मण एकहोतेत्येतस्यानुवाकस्य दश स्रुवाहुतीरथ यद्यन्वाहार्यपचन उद्वायेद्गार्हपत्यादेनमुद्धृत्यान्वाहार्यपचने चतुर्होतारं जुहोति गार्हपत्ये दशात्मकमथ यद्याहवनीय उद्वायेद्गार्हपत्यादेनमुद्धृत्याहवनीये पञ्चहोतारं जुहोति[3] गार्हपत्ये दशात्मकमथ[3] यदि सवनगतानामग्नीनामाग्नीध्रीय[4] उद्वायेच्छालामुखीयादेनमुद्धृत्याग्नीध्रीये षड्ढोतारं जुहोति शालामुखीये दशात्मकमथ यद्यौत्तरवेदिक आहवनीय उद्वायेदाग्नीध्रीयादेनमुद्धृत्यौत्तरवेदिक आहवनीये सप्तहोतारं जुहोत्याग्नीध्रीये दशात्मकम् ॥ १० ॥

एतयैवावृतैकस्मिन्नुद्वाते द्वयोर्वा प्रतिविभज्य होतॄञ्जुहुयाद्याहुतीस्त्वेद्यास्ताः समस्ताश्च जुहुयात्तथा मिन्दाहुती जुहुया-

---

१ These two words found in C′ H U (in U they are cancelled), U ins. चय after ०धाय ।

२ These two words om. Tr C′ H.

३ H B read हुत्वा and insert जुहुयात् after दशात्मकम् ।

४ सवनगतानामग्नीनाम् om. Tr.

न्मनस्वतीं चेदाहवनीये जुहुयात्तेषाजस्राणामन्वाहितानाꣳ सवनगतानां चाग्नीनामुद्वातानां प्रायश्चित्तिरेतदेव[1] होमकाले ऽन्वाधानवर्जमथ यस्याग्निरुद्धृतो[2] ऽहुते ऽग्निहोत्र उद्वायेदिति यथासूत्रं[3] वा कुर्यादपि वा गार्हपत्यादिध्ममादीप्य[4] मन्थनमधिमन्थनमुपसमिन्धनमित्येतान्मन्त्रान्निगदेपि[5] वा ज्योतिष्मतीमिष्टिं निर्वपेदपि वा ज्योतिष्मतीभ्यामृग्भ्यां पूर्णाहुतिं जुहुयादपि वा ज्योतिष्मतीꣳ स्रुवाहुतिं जुहुयादग्नये ज्योतिष्मते स्वाहेतीष्टिपूर्णाहुतिस्रुवाहुतीनां पूर्वंपूर्वं विधिं बलीयाꣳसमाचार्या ब्रुवते । तत्रोदाहरन्ति

ये ये विशेषा लघवो यत्र यत्रोपलक्षिताः ।
कर्म तैर्न प्रसङ्गेन कुर्यादापत्सु तद्धुनम्[6] ॥
विशेषान्सर्ववेदेभ्यः[7] प्रयत्नेनोपधारयेत्[8] ।
कर्मणां प्रविचारार्थमापत्सु[9] च समाप्नुयादिति ॥

---

१ Thus C′ H B U (pr. m.) and the Viv.; °त्तिषैव Tr, °त्तिरेवाथ यदि U (sec. m.).

२ यद्यस्याग्नि° Tr.

३ Viz. according to the ritual exposed in XIII. 7 : 124. 1.

४ Instead of °मादीप्य H U उद्धृत्य ।

५ अधिमंथनम् found in C′ Tr H U (pr. m.).

६ तद्धुतं H U.

७ °देवेभ्यः H Tr and once in the Viv.

८ प्रयत्नेनो° B.

९ प्रतिचारा° B U.

यदि प्रसङ्गेन कृतं च[१] लौक्ये[१] मुग्धैर्वा[२] बालैर्कृतं[२] स्याद्विहृतं[३] च पत्न्या तानरण्योरग्नीन्[४] समारोह्योद्वसाय[५] मथित्वाग्नीन्विहृत्य पूर्णाहुतिस्तन्तुमती च कार्येत्यथ यद्यप्रसङ्गेन कृतं च[६] लौक्ये[६] मुग्धैर्वा[७] बालैर्कृतं[८] स्याद्विहृतं च पत्न्या ताम्व्याहृतीभिर्विहृत्य पूर्णाहुतिस्तन्तुमती च कार्येति ॥ ११ ॥ अष्टमः ॥

अथ वै भवति[९] निर्ऋतिर्वा एतस्य यज्ञं गृह्णाति यस्या कस्यां च हविः चायति[१०] यद्यवदानानि विन्दन्ति नात्र प्रायश्चित्तं कुर्वन्ति। दहति ह वा एषो ऽध्वर्युरवदानानि। समू[११]ह्वैतान्येष[११] तर्पयति[११]। दहति ह वा एष य[१२] आज्यं[१२]

---

१ ? चलौक्यं Tr U. चलौक्ये C′ the Viv., चेलौवे H, चेलौक्ये B.

२ Thus B C′, मुग्धैर्नवा H, मुग्धेनवा Tr U the Viv.

३ विहृते H U.

४ Thus Tr and the Viv., त्तानारण्यो॰ H, यारण्यो॰ B U, तारण्यो॰ C′.

५ समारोप्योद्वसाय H U, समारोप्य B, समारोह्य Tr C′.

६ Thus Tr C′ the Viv., चैलोक्ये B, स्यालौक्ये H, लौकिक्यं U.

७ Thus B, मुग्धैनवा H, मुग्धेनवा U C′, मुग्धेगधनवा Tr.

८ Thus Tr B, बालैर्कृतं C′, बालैर्वाकृतं H U.

९ These three words not in H Tr.

१० Thus (and cp. Āp. IX. 1. 17) Tr B U the Viv. धारयति C′, धपर्यति H.

११ समूह्वैतान्येष संतर्पयति U, समूह्वैतान्येष तर्पयति Tr, समूहैर्नान्येष संत॰ H, समूहैर्नेतान्येष संत॰ B, समूहैतान्येषः संत॰ C′.

१२ Thus Tr and the Viv., यदाज्यं the other MSS.

पुरस्ताद्धुत्वाथावदानानि जुहोत्याज्येनोपरिष्टान्नाभिघारयति । तेषाꣳ संदग्धानां न देवास्तृप्यन्ति[1] न यजमानो । ऽथ हैनान्येष संतर्पयति य आज्यं पुरस्ताद्धुत्वाथावदानानि जुहोत्याज्येनोपरिष्टादभिघारयति । तेषाꣳ संदग्धानां तृप्यन्ति[2] देवास्तृप्यति[2] यजमानो[2] । ऽथ यद्याग्नेयात्पुरोडाशादग्नीषोमौ यजेताग्नीषोमीयाद्वाग्निं यजेत नैतत्प्रदानमित्याहवनीये स्रुवाहुतिं जुहुयाद्यद्वो देवा अतिपादयानीति । देवपवित्रमाग्नेय्यो याज्यापुरोनुवाक्या देवपवित्रमैन्द्रियो[3] देवपवित्रं प्राजापत्या देवपवित्रं व्याहृतय इत्यथ यदि होता याज्यापुरोनुवाक्यासु मुह्येत सर्वाभिराग्नेयीभिर्यजेतेति । विज्ञायते ऽग्निः सर्वा देवता इत्यैन्द्रीभिर्विज्ञायत[4] इन्द्रो वै सर्वा देवता इति । प्राजापत्याभिर्विज्ञायते प्रजापतिः सर्वा देवता इति । व्याहृतीभिर्विज्ञायते सर्वा वा ऋचः सर्वाणि सामानि सर्वाणि यजूꣳषि यद्व्याहृतय इत्यथ यदि यजमानो याजमानेषु मुह्येत व्याहृतीभिरेवान्तरेण वेद्युत्करौ प्रपदन[5] व्याहृतीभि-

---

१ देवतास्तृ॰ U (sec. m.).

२ Thus Tr, देवा (or देवता) तृप्यंत्यथ यज॰ U (sec. m.) B, देवास्तृप्यंति यजमानो H; C′ incomplete.

३ Thus U, ॰मिंद्रियो C′, ॰मैन्द्र्यो Tr U the Viv., ॰मैन्द्रिया H.

४ After the instrumental here and infra some of the MSS. ins. वा ।

५ प्रपादनं Tr. C′.

रेवोपनिष्क्रमणं व्याहृतीभिरेवानुमन्त्रणं । विज्ञायते[१] सर्वा वा ऋचः सर्वाणि सामानि सर्वाणि यजूꣳषि यद्व्याहृतय इत्युपासते ह वै यज्ञं देवा[२] अन्तरिता[३] इदमु नो हविर्न कृतं तद्धोष्यत[४] इत्यां स्विष्टकृत इत्येक । एडाया इत्येक । आनुयाजेभ्य[५] इत्येक । आ शंयुवाकादित्येक । आ समिष्टयजुष इत्येक । ऊर्ध्वं चेत्समिष्टयजुषः स्मरेत्सꣳस्थाप्यैतामिष्टिमन्यामिष्टिमनुल्बणां तन्वीत । यज्ञो ह[६] वै[६] यज्ञस्य प्रायश्चित्तिरिति विज्ञायते ॥ १२ ॥ नवमः ॥

अथ सांनाय्यदुहो[७] धयेयुश्चेद्वत्सा वायव्यया[८] यवाग्वा[८] सायं यजेतां्येकस्यां दुग्धायां न[९] धीतां[९] दोहयेद्दुग्धाभिः सꣳस्थाप्यादुग्धानां[१०] वत्सानपाकृत्य श्वः सांनाय्येन यजेत ।

---

१ च ins. H U C′.

२ देवता H C′.

३ Thus H U C′, अंतरिता Tr B.

४ तद्धाडो॰ Tr.

५ Thus, not आनू॰ the MSS.

६ हैव Tr.

७ सान्नायांदो Tr, साय्यदुहो H.

८ Thus C′ Tr and the Viv.; वायव्याया यवाग्वा B C′. वायव्यया-यंवाग्वा C′.

९ ? नाधीतां Tr, नधीता B, नपीतां H U C′. The Vivaraṇa periphrases: अन्यामानीय तां दोहयीत (sic) ।

१० ॰स्थाप्य दुग्धानां Tr H.

सायंदोहश्चेदार्तिमार्च्छेदिन्द्राय[1] व्रीहीन्निरुप्योपवसेदिति यथासमाम्नातमपि वा प्रातर्दोहं द्वैधं कृत्वान्यतरदातच्य[2] सायंदोहस्थाने कुर्याच्छृतस्थान[3] इतरत्प्रातर्दोहश्चेदार्तिमार्च्छेदैन्द्रं वा माहेन्द्रं वा पुरोडाशं निरुप्य तेन दध्ना सह प्रचरेदुभयं चेदार्तिमार्च्छेदैन्द्रं[4] पञ्चशरावमोदनं निर्वपेदिति। प्रसिद्धमाग्नेयेन प्रचर्यैन्द्रेण प्रचरेत्सर्वाणि चेद्धवींषि दुष्येयुर्नश्येयुरपहरेयुर्वाज्येनैता देवताः प्रतिसंख्यायमिष्ट्वैतामिष्टिमन्यामिष्टिमनुस्वणां[5] तन्वीत। यज्ञो ह[6] वै[6] यज्ञस्य प्रायश्चित्तिरिति विज्ञायते। ॥ १३ ॥ दशमः ॥

अथातश्छन्दस्यनाम्नातानि[7] कृतानुमन्त्रणानि व्याख्यास्यामो। वैमृधमिष्टमनुमन्त्रयत इन्द्रस्य वैमृधस्याहं देवयज्ययेन्द्रियाव्यसपत्नो वीर्यवाञ्छ्रीमान्भूयासित्यसपत्नो वीर्यवान्भूया-

---

१ After इन्द्राय C′ H U and the Viv. ins. वा महेन्द्राय वा but cp. T Br. III, 7. 1. 6.

२ ॰न्यतरमातच्य B U, ॰न्यतरदाषिच्य C′.

३ शृतस्थान इतरत् only in H U C′.

४ स्वार्तिमार्च्छेत् om Tr H C′.

५ प्रतिसंख्यामि॰ Tr; C′: प्रतिसंख्ययामि॰; the Viv. and B U as given in the text.

६ चेव Tr.

७ The Prāyaścitta candrikā makes the interesting statement, that these anumantraṇa formulas are taken from the Kāṭhaka (कंठोक्तः sic). Some of them occur indeed in the Kāṭhaka (v. i: 44. 5 sqq.).

समिति वा[1] । पर्जन्यस्याहं देवयज्यया सुयवसो[2] भूयासꣳ । सोमस्याहं देवयज्यया प्र प्रजया च पशुभिश्च जनिषीय सुरेता रेतो धिषीयेति वा । सवितुरहं देवयज्यया स्वस्तिमान्पशुमान्भूयासꣳ । सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं पुषेयꣳ । सरस्वतो ऽहं देवयज्यया श्रद्धामना भूयासं । पूष्णो ऽहं देवयज्यया पुष्टिमान्पशुमान्भूयासं[3] । मरुतामहं देवयज्यया प्राणैर्ऋध्यासं । विश्वेषां देवानामहं देवयज्यया प्राणैः सायुज्यं गमेयं । द्यावापृथिव्योरहं देवयज्ययोभयोर्लोकयोर्ऋध्यासं भूमानं प्रतिष्ठां गमेयमिति वा । वाजिनामहं देवयज्यया रेतस्वी भूयासं । वरुणस्याहं देवयज्यया धर्मभाग्भूयासं । कस्याहं देवयज्यया ग्रविष्ठो[4] भूयासं । विश्वकर्मणो ऽहं देवयज्यया विश्वानि कर्माण्यवरुन्धीयादित्या अहं देवयज्ययाꣳहसो मुच्येय । वायोरहं देवयज्यया रत्नभाग्भूयासꣳ । सूर्यस्याहं देवयज्यया सुदृशीको भूयासमग्नाविष्णवोरहं देवयज्यया वीर्यवान्भूयासं । विष्णोरहं देवयज्यया

---

१ H U C′ ins. पर्जन्यमिष्टमनुमन्त्रयते H U C′, and thus each time further on, mutatis mutandis, before each formula (e.g. after सुयवसो भूयासमिति सोममिष्टमनुमन्त्रयते सोमस्याहं etc.). But cp. the expression (p. 342. 2.) यथादेवतमिष्टमनुमन्त्रयते ।

२ सूयवसो Tr only.

३ पशुमान् in Tr C′ and Prāy. candrikā only.

४ गर्विष्ठो Tr B.

शिपिविष्टो भूयासमर्यम्णो ऽहं देवयज्यया सुवर्गं[१] लोकं गमेयमिति। यथादेवतमिष्टमनुमन्त्रयत[२] एवमनादिष्टानष्टा-कपालानाग्नेयविकारानाचक्षत एकादशकपालानग्नीषोमीय-विकारान्द्वादशकपालान्वैश्वदेवविकारानेककपालं भूमिकपालं च द्यावापृथिव्यविकारावतो[३] ऽन्यानाग्नेयविकारांꣳस्तन्सौम्य-विकारान्दधिपयश्चामिक्षापशव:[४] सांनाय्यविकारा[५] वनस्पतिः स्विष्टकृद्विकार। उपांꣳशुयाजानुपांꣳशुयाजविकारानाचक्षत[६] इत्यथाप्युदाहरन्ति[६] हविःसामान्यं देवतासामान्यं कपाल-सामान्यमिति हविर्देवताकपालसामान्ये हविःसामान्यं बलीय[७] इत्यपि[७] वास्य यज्ञस्यागुर उद्दृचमशीयेति सार्वत्रिकम्।

॥ १४ ॥ एकादशः ॥

॥ इति सप्तविंꣳशः प्रश्नः ॥

---

१ Thus U C′ Prāy. candr., स्वर्गं Tr B H.

२ ०दैवत० H U C′.

३ Thus B U H Viv., ०विकारानतो Tr C′.

४ Thus (०विकारान्दधि०) U C′ and Viv.; ०विकारांदधि० Tr, ०विकारादधि० H, ०विकारानिति शालीकिर B. — C′ breaks off after पयश्चामिक्षापशून्स (sic).

५ Thus Tr U B, ०विकारान् H.

६ Thus U; ०कारावचक्षत इत्य० H, कारानित्यथा Tr B.

७ Thus B H U and the Viv., बलीयोऽपि Tr.

अथ वै भवति यः पापयक्ष्मगृहीतः स्याद्यो वापरुध्येत देवेभ्य ऋषिभ्यः पितृभ्यो गोभ्यो ब्राह्मणेभ्य[1] स्तेनाभिशस्तो ऽभिशस्यमानो वा रहस्येष्ट्या यजेतेत्येतयेष्ट्या यक्ष्यमाण उपकल्पयते हिरण्यं' तस्याः प्रज्ञात उपवसथो' ऽथ प्रातर्हुते ऽग्निहोत्रे पुरापां प्रणयनाद्गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने येन देवाः पवित्रेणात्मानं पुनते सदा। तेन सहस्रधारेण पावमान्यः पुनन्तु मा स्वाहेत्य'परं चतुर्गृहीतं गृहीत्वाहवनीय एव जुहोति प्राजापत्यं पवित्रꣳ शतोद्यामꣳ हिरण्मयम्। तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे स्वाहेत्य'परं चतुर्गृहीतं गृहीत्वाहवनीय एव जुहोतीन्द्रः सुनीती सह मा पुनातु सोमः स्वस्त्या वरुणः समीच्या। यमो राजा प्रमृणाभिः पुनातु मां जातवेदा मोर्जयन्त्या पुनातु स्वाहेत्य'थ पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयाग्नये ऽꣳहोमुचे ऽष्टाकपाल इति दशहविषमिष्टिं निर्वपति श्रपयित्वासादयति' तस्याः सप्तदश सामिधेन्यः' समिध्यमानां च समिद्धां चान्तरेण पावकवत्यौ धाय्ये दधात्यपामिदं न्ययनं नमस्त इति द्वे[2]' पावकवन्तावेवाज्यभागाव'ग्नी[3] रक्षाꣳसि सेधति शुक्रशोचिरमर्त्यः। शुचिः पावक ईड्य इति

---

१ B U ins. पशुभ्य, which is neither found in the Prāy. pradīpa देवेभ्य: पितृभ्य ऋषिभ्यो गोभ्यो ब्राह्म° Tr, देवेभ्य ऋषिभ्यो ब्राह्मणेभ्यः पितृभ्य H.

२ द्वाभ्यां Tr B, द्वे H.

३ एव given by Tr only.

पुरोनुवाक्यामनूच्य यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा। ब्रह्म तेन पुनीमह इति यजति। यो धारया पावकया परिप्रस्यन्दते सुतः। इन्दुरश्वो न कृत्विय[1] इति पुरोनुवाक्यामनूच्या कलशेषु धावति पवित्रे परिषिच्यते। उक्थैर्यज्ञेषु वर्धत इति यजत्यथ हविषामग्नेर्मन्वे प्रथमस्य प्रचेतस इत्येतस्मिन्ननुवाके याज्यापुरोनुवाक्याः सहसंयाज्या भवन्त्यथ[2] पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोति पवमानः सुवर्जन इत्येतेनानुवाकेन प्रत्यृचं। प्रसिद्धेडाथान्वाहार्यमासाद्य हिरण्यं ददाति। समानं कर्मा पत्नीसंयाजेभ्यो ऽथ पुरस्ताद्गृहपतेः स्रुवाहुतीरुपजुहोति यद्देवा देवहेडनमित्येतेनानुवाकेन प्रत्यृचꣳ। संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा। विसृजते व्रतमेतयैव यजेतर्तुव्यतिक्रमे[3] दारव्यतिक्रमे ऽयोनौ वा रेतः सिक्त्वैतयैव यजेत पातकोपपातकसंयुक्तो[4] द्वादशाहं महापातकसंयुक्तो मासं पुण्यमिच्छन्संवत्सरमृतुं वा तामेतां महापवित्रेष्टिरित्याचक्षते मृगारेष्टिरिति वा रहस्येष्टिरिति बौधायनः[5]। ॥ १ ॥ प्रथमः ॥

---

१ Thus Tr U H, कृत्व्य B.

२ भवन्तीत्यथ Tr.

३ यजेतर्त्वतिक्रमे Tr.

४ पातकोवपातक॰ Tr, पातकोपातक॰ B. The Viv.: पातकोपपातकः महापातकानां रहस्यकृतानाम्।

५ Tr B H repeat the last three words.

अथो एतस्मो ऽपरिमितं प्रवसतीति[१] न संवत्सरमति प्रवसतीत्येवेदमुक्तं भवति स उ चेदति प्रवसेत्पवित्रेष्ट्या यजेतेत्येतयेष्ट्या यक्ष्यमाण उपकल्पयते हिरण्यं । तस्याः प्रज्ञात उपवसथो । ऽथ प्रातर्हुते ऽग्निहोत्रे पुरापां प्रणयनाद्गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये जुहोत्यन्वारब्धे यजमाने येन देवाः पवित्रेणात्मानं पुनते सदा । तेन सहस्रधारेण पावमान्यः पुनन्तु मा स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाहवनीय एव जुहोति प्राजापत्यं पवित्रं शतोद्यामꣳ हिरण्मयम् । तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे स्वाहेत्यपरं चतुर्गृहीतं गृहीत्वाहवनीय एव जुहोतीन्द्रः सुनीती सह मा पुनातु सोमः स्वस्त्या वरुणः समीच्या । यमो राजा प्रमृणाभिः पुनातु मां जातवेदा मोर्जयन्त्या पुनातु स्वाहेत्यथ पृष्ठ्याꣳ स्तीर्त्वापः प्रणीयाग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपति सरस्वत्यै प्रियाया उपाꣳश्वाज्यमग्नये पावकाय पुरोडाशमष्टाकपालं निर्वपति सवित्रे सत्यप्रसवायोपाꣳश्वाज्यमग्नये शुचये पुरोडाशमष्टाकपालं निर्वपति वायवे नियुत्वत उपाꣳश्वाज्यमग्नये व्रतपतये[२] पुरोडाशमष्टाकपालं निर्वपति विष्णवे शिपिविष्टायोपाꣳश्वाज्यमग्नये वैश्वानराय पुरोडाशमष्टाकपालं निर्वपति दधिक्राव्ण उपाꣳश्वा-

---

१ इति not in the MSS., but cp. III. 14 : 85. 2.

२ °तय इति Tr.

ज्यमिति । अपयित्वासादयति । तस्याः सप्तदश सामिधेन्यः । समिध्यमानां च समिद्धां चान्तरेण पावकवत्यौ धाय्ये दधात्यपामिदं न्ययनं नमस्त इति द्वे[1] । पावकवन्तावेवाज्यभागावग्नी रक्षाꣳसि सेधति शुक्रशोचिरमर्त्यः । शुचिः पावक ईड्य इति पुरोनुवाक्यामनूच्य यत्ते पवित्रर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनीमह इति यजति । यो धारया पावकया परिप्रस्यन्दते सुतः । इन्दुरश्वो न कृत्विय इति पुरोनुवाक्यामनूच्या कलशेषु धावति पवित्रे परिषिच्यते । उक्थैर्यज्ञेषु वर्धत इति यजत्यथ हविषामग्न आयूꣳषि पवस ऽग्ने पवस्वेत्यग्नेः पवमानस्योत नः प्रिया प्रियास्विमा जुह्वाना युष्मदिति सरस्वत्याः प्रियायाः अग्ने पावक स नः पावकेति पावकस्या विश्वदेवमा सत्येनेति सवितुः सत्यप्रसवस्याग्निः शुचिव्रततम उदग्ने शुचयस्तवेति शुचेर्वायुरग्रेग वायो शुक्रो अयामि त इति वायोर्नियुत्वतस्त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानीति व्रतपतेः प्र तत्ते अद्य किमित्ते विष्णो परिचक्ष्यं भूदिति विष्णोः शिपिविष्टस्य वैश्वानरो न ऊत्या पृष्टो दिवीति वैश्वानरस्य दधिक्राव्णो अकारिषमा दधिक्रा इति दधिक्राव्णो । ऽथ कृतानुमन्त्रणमग्नेः पवमानस्याहं देवयज्यया शुचिः पूतो मेध्यो विपाप्मा ब्रह्मवर्चस्यन्नादो भूयासमग्नेः पावकस्याग्नेः शुचेरग्नेर्व्रतपतेरग्नेर्वैश्वानरस्याहं देवयज्यया शुचिः

---

१ द्वाभ्यां Tr B.

पूतो मेध्यो विपाप्मा ब्रह्मवर्चस्यन्नादो भूयासमित्युपांशुयाजायामुपांशुयाजवदित्यथ[1] पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोति पवमानः सुवर्जन इत्येतेनानुवाकेन प्रत्यृचमतिथिवत्यौ[2] दमूनवत्यौ संयाज्ये जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान् । विश्वा अग्ने अभियुजो विहत्य शत्रूयतामाभरा भोजनानि ॥ मर्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अतिथिः शिवो नः । सहस्रशृङ्गो वृषभस्तदोजा विश्वाꣳ अग्ने सहसा प्रास्यन्यानिति प्रसिद्धेडायान्वाहार्यमासाद्य हिरण्यं ददाति समानं कर्म पत्नीसंयाजेभ्योऽथ पुरस्ताद्गृहपतेः स्रुवाहुतीरुपजुहोति यद्देवा देवहेडनमित्येतेनानुवाकेन प्रत्यृचꣳ संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा विसृजते व्रतमेतयैव यजेताभिशस्तोऽभिशस्यमानो वैतयैव यजेतर्तुव्यतिक्रमे[3] दारव्यतिक्रमेऽयोनौ वा रेतः सिक्त्वैतयैव यजेत संवत्सरमर्धपादमेकविंशतिरात्रं[4] वा तिर्यग्योनिगताञ्ज्ञातीञ्जात्यन्तरे[5] वर्तमानान्दुष्कृतैरपरुद्धान्दश पूर्वा-

---

१ °शुयाजविकारवदित्यथ H U.

२ °मत्यौ U.

३ Thus B U H and Prāy. candr.; Tr. omits the passage.

४ Thus (अर्धपादम्) H and Prāy. candr., °मूर्ध्वपाद° U, मध्यपाद° Tr B. The meaning acc. to the Vivaraṇa is: द्वौ मासौ ।

५ ज्ञातीन Tr and the Viv. °ज्ञातान् U; B and H. om.

न्दशापरानात्मानं चैकविंꣳशं[१] पङ्क्तिं च पुनाति न[२] च[२] पुनरावर्तत[२] इत्यथाप्युदाहरन्ति

वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च।

ऋतावृतौ प्रयुञ्जानः पुनाति दशपूरुषमिति[३]। ॥ २ ॥

द्वितीयः ॥

अथातो नक्षत्रेष्टीर्व्याख्यास्यामो। ऽग्निर्वा अकामयतान्नादो देवानाꣳ स्यामिति ता ब्राह्मणेन[४] व्याख्याताः। सा या वैशाख्याः पौर्णमास्याः पुरस्तादमावास्या भवति स नक्षत्रसंवत्सरस्यापभरणीभिः[५] संपद्यते तस्यामारभेतेति। तस्या उपवसथे ऽरण्योरग्नीन्समारोह्योदवसाय[६] मथित्वाग्नीन्विहृत्याजस्रान्वापि वा[७] पौर्णमास्याममावास्यायां वोपवसेद्यस्यां[८] तन्नक्ष

१ Thus B U, विंशति H Tr and Prāy. candr.

२ These words omitted by Tr as also the following इति; the Prāy. candrikā reads न स पुन॰।

३ Thus (and cp. Baudh. dhś. I. 2. 17, Vas. dhs. XXII. 10) Tr B (the last only ॰पुरुष॰ and U (sec. m.) and Prāy. candr.; पवित्रेष्टिमृतावृतौ। स्वगारेष्टिं प्रकुर्वाणः पुनात्याविंꣳशतिं (or पुनाति वि॰) कुलमिति H and U (pr. m.).

४ See T Br. III. 1. 4 sqq.

५ Thus Tr B U (sec. m.) ॰भरण्या H U (pr. m.) Prāy. candr.

६ ॰रोप्यो॰ B U H Prāy. candr.

७ Om. U B.

८ उपवसेत् om. Tr.

संपद्यते । तच्चैषो ऽत्यन्तप्रदेशो । हविरुच्छिष्टव्रतो[1] यजमानो[2] भवतीति विज्ञायते ऽपि वा जन्मनक्षत्रे कुर्यादायुष्कामस्य[3] यावज्जीवं[3] त्र्यवरार्ध्या वा प्रयोगो । जीववन्तावाज्यभागौ यजत्या नो अग्ने सुकेतुना[4] त्वꣳ सोम महे भगमित्यथ[4] निर्वपत्यग्नये कृत्तिकाभ्यो जुष्टं निर्वपामीत्यग्निं[5] कृत्तिका यजेति संप्रेष्यत्याग्नेयमष्टाकपालमनुमत्यै चरुमिति[6] सर्वत्रानुषजति नक्षत्रहविर्मध्ये । अपथिलासादयति । तस्याः सप्तदश सामिधेन्यः । समिध्यमानां च समिद्धां चान्तरेण श्रीमत्यौ धाय्ये दधाति स्वारुहा यस्य श्रियो दृशे ऽदाभ्यः पुरएतेति । रयिमन्तौ पुष्टिमन्तावाज्यभागौ[7] यजत्यग्निना रयिमश्नवद्गयस्फानो अमीवहेत्यथ हविषामग्निर्मूर्धा भुवो ऽनु नो ऽद्यानुमतिरन्विदनुमते त्वमिति संचरयोर्याज्यापुरोनुवाक्या ।

---

१ ॰व्रतोपायो H U.

२ Om. Tr.

३ Thus reads Tr; the three other MSS. : ॰दायुष्कामस्त्र्यवरार्ध्यौ; the manuscript tradition, however, seems to be defective, the Vivaraṇa runs : अपि वा जन्मनि क्रियेतायुष्कामः किं तत्र स्वजन्मनक्षत्रदैवत्यामिष्टिं यावज्जीवमथ वा त्र्यवरार्ध्यः प्रयोगः । जन्मनक्षत्रदैवत्यामिष्टिं जन्मनक्षत्रे निर्वपेदायुष्कामोऽत ऊर्ध्वं यथाक्रममायुष्कामस्य ।

४ The two mantras are given Sakalapāṭhena in B.

५ इति om. U B H.

६ इति om. Tr B H.

७ पुष्टिमन्तौ om. Tr.

नक्षत्रविषान्नग्निर्नः[१] पातु कृत्तिका[२] इति यथासमाम्नातमथ पुरस्तात्स्विष्टकृतः स्रुवाहुतीरुपजुहोत्यग्नये स्वाहा कृत्तिकाभ्यः स्वाहेति यथासमाम्नातꣳ[३] । स्विष्टवत्यौ[४] संयाज्ये हव्यत्राहꣳ स्विष्टमिति । संतिष्ठत एषेष्टिः सपूर्णपात्रविष्णुक्रमा । विसृजते व्रतम् । ॥ ३ ॥

एवमुत्तरमुत्तरं[५] प्रतितन्त्रमुत्तरउत्तरे[६] ऽहनि यजेत । विशेषान्व्याख्यास्यामः । प्रजापतिः सवितेत्युपाꣳशु सर्पेभ्य आश्रेषाभ्य[७] आज्ये करम्भमिति । सर्वे यवा भवन्त्यधिश्रयणकाले तिरः पवित्रमाज्यमानीयाधिश्रित्य[८] तिरः पवित्रं करम्भानानयति[९] । पितृभ्यो मघाभ्यः पुरोडाशꣳ षट्कपालमिति । पैतृयज्ञिकेन निर्वपणप्रोक्षणाधिवपनसंवपनादीनि[१०] व्याख्यातानि भवन्ति । तार्तीयसवनिकेन[११] सौम्येन प्रचरणकल्पो व्याख्यातो ।

---

१ ॰हविषोऽग्नि॰ H.

२ Tr gives a longer citation of the pratika.

३ Tr. ins. अथ।

४ ॰कृतौ U H.

५ एवमेवमु॰ U H.

६ Thus Tr; प्रतिमंत्रमु॰ H U, मंत्रमु॰ B and the Viv.

७ Thus (॰श्रे॰) B and Prāy. candr. as T Br. III. 1. 4. 7; ॰स्रे॰ U H Tr.

८ अधिश्रित्य given only by Tr.

९ Thus Tr B H and Prāy. pradipa; ॰भमानयति U.

१० ॰संवपन॰ om. Tr; ॰संयवनादीनि the Viv.

११ ॰सवनीयेन Tr.

ऽयैतद्वायवे निष्ट्यायै गृष्ट्यै दुग्धमिति । पयसः प्रातर्दोहवत्संस्कार[१] । श्वा[१] विशाखाभ्यामिष्ट्वा तदानीमेव पौर्णमासीमाज्येन यजेताथ श्वो भूते मित्रायानूराधेभ्यश्चरुमित्युत्तराभिरषाढाभिरिष्ट्वा[२] तदानीमेवाभिजिता यजेताथ श्वो भूते विष्णवे श्रोणायै पुरोडाशं त्रिकपालमित्युत्तरेषु प्रोष्ठपदेषु पुरोडाशं भूमिकपालमिति । कपालमात्रं[३] भूमौ परिलिख्याङ्गारमधिवर्तयति[४] । तस्यैककपालवत्संस्कार[५] । आपभरणीभिरिष्ट्वा[५] तदानीमेवामावास्यामाज्येन यजेताथ श्वो भूते चन्द्रमसे प्रतीदृश्यायै पुरोडाशं पञ्चदशकपालमित्यभिनीयैवाह्नि[६] निर्वपेदुदिते चन्द्रमसि प्रचरेत्तं एतमहोरात्राभ्यां चरुं निरवपतां द्वयानां व्रीहीणां शुक्लानां च कृष्णानां न सवात्योर्दुग्धे श्वेतायै च कृष्णायै चेत्यभिनीयैवाह्नि[६] निर्वपेदस्तमिते प्रचरेदपि वा सन्धावेव निर्वपेत्सन्धावेव प्रचरेन्निर्वपणन्यायेन[७] प्रचरेदथैतमुषसे चरुमित्यभिनीयैव रात्रौ निर्वपेदुषसि प्रचरेदथैतस्मै नक्षत्राय चरुं निर्वपति । यथा त्वं देवानामस्येवमहं मनुष्याणां भूयासमिति निर्वपण-

---

१ ? Thus Tr B; ०रोषावि० H, ०रोषवि० U.

२ ०षानुराधे० Tr.

३ ०मंत्रं Tr.

४ प्रलि० U H.

५ ? Thus B; ०रोषापभ० U, ०रोपभ० H Tr.

६ हविर् ins. H.

७ निर्वपणन्यायेन प्रचरेत् in Tr only.

काले यजमानायतन आसीनो यजमानो जपत्यभिनीयैवाहनि[1] निर्वपेद्दितेषु नक्षत्रेषु प्रचरेद्यैतꣳ सूर्याय नक्षत्रेभ्यश्चरुमित्यभिनीयैव रात्रौ निर्वपेदुदिते सूर्ये प्रचरेद्यैतमदित्यै चरुमथैतं विष्णवे चरुमिति यजति[2]। यज्ञो वै विष्णुर्यज्ञ एवान्ततः प्रतितिष्ठतीति ब्राह्मणं। वरो[3] दक्षिणा भवतीति[3] विज्ञायते ऽपाधावद्धा[4]। प्रसिद्धः पशुः। पाथिकृत्येष्ट्वा दर्शपूर्णमासाभ्यां यजेत नक्षत्रसत्त्रेण चुतिरानन्त्याय। [5]ज्योतिषामयनेनेष्ट्वा पापं निर्णुद्य[6] ज्योतिष्टमुपजायते ऽप पुनर्मृत्युं जयतीति ह[7] स्माह[7] बौधायनः। ॥ ४ ॥

तृतीयः ॥

नवैरेवामावास्यायां[8] पौर्णमास्यां[8] वा यजेत नवैर्वाग्नि-

---

१ हविर् ins. H.

२ Om. Tr.

३ वरा दक्षिणा भवन्तीति Tr.

४ Thus (and cp. the Journal of the German Oriental Society, Vol. LVII, p. 742) U Tr, पाद्यावद्धा B, पाकद्रा H. The Vivaraṇa runs: अपाधावद्धा दक्षिणा इति शेषः। यथा अपाधास्तु श्रूयन्ते दक्षिणाः सास्नाविहि पष्ठौही वरान्द्याश्कꣳसं च स्त्रियै चाभारꣳ सम्बद्धा इति (cp TBr. III. 12. 4. 7).

५ Tr ins ज्योतिषा।

६ निर्नुद्य Tr.

७ Om. B.

८ Thus Tr H and the Viv.; ०मावास्यां पौर्णमासीं वा U, नवैरेव पौर्णमासीममावास्यां वा B; the accus. instead of the locat. also Āp. VI. 30. 13.

होत्रं[१] जुहुयाद् ।पि वाग्निहोत्रीं वा[१] नवानादयित्वा[२] तस्याः पयसा जुहुयाद् ।पि[३] वा[३] नवानां[३] यवाग्वा[३] सायंप्रातरग्निहोत्रं जुहुयाद् ।पि वा गार्हपत्ये चतुःशरावमोदनꣳ श्रपयित्वाग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्यो[४] जुहुयाद् ।पि वा नवैरेव ब्राह्मणान्भोजयेत्स[५] । एष[५] दश्युपचारकल्पो[६] हरितयवशमीधान्यौषधिवनस्पतिमूलफलशाकानामनिष्टाग्रयणं[७] याथाकामी[८] स्यात्पङ्क्तिवैषम्याद्व्री ।हिभिरिष्ट्वा[९] व्रीहिभिरेव[१०] यजेता यवेभ्यो यवैरिष्ट्वा यवैरेव[१०] यजेता व्रीहिभ्यो । ऽपि वा व्रीहिभिरेव[११] यवैर्वा यजेत । संतिष्ठन्त आग्रयणानि । ॥ ५ ॥ चतुर्थः ॥

---

१ Thus H U and the Viv.; नवैरेवा॰ B Tr.

२ Thus U and the Viv., वा नवानदयि॰ Tr, यावानादयि॰ H. वैनानादयि॰ B.

३ Om. Tr; cp. Āp. l. c. 15.

४ Thus (as gṛhyasūtra and Hir. śrs. III. 8. 23) Tr B. ॰र्थीभ्यो (as Āp. l. c. 16,) H U.

५ Thus U and the Viv., ॰स एवैष Tr, H B om. स ।

६ Thus Tr; दश्यपचार॰ B U, दश्यपचारि॰ H.

७ ॰शिंबी॰ instead of ॰शमी॰ H; ॰फलमूल॰ instead of ॰मूलफल॰ U; ॰निष्टापि instead of ॰निष्टाग्रयणं (thus B U H and Viv.) Tr.

८ Thus B H, यथा॰ Tr U Viv.

९ Thus U and the Viv.; स्यात्पङ्क्तिवै॰ B, स्यात्तात्पंक्तिवै॰ H, स्यात्तात् पङ्क्तिवै॰ Tr.

१० एव om. Tr.

११ एव om B U.

अथातः पशुप्रायश्चित्तानि व्याख्यास्यामः । स यदि पशुरुपाकृतो वाश्येत यदस्य पारे रजस इत्येताꣳ हुत्वा नैमित्तिकीं[१] द्वितीयां जुहोति यस्माद्भीषावाशिष्ठास्ततो नो अभयं कृधि । प्रजाभ्यः सर्वाभ्यो मृड नमो रुद्राय मीढुषे स्वाहेति[२] । यस्माद्भीषावेपिष्ठाः पलायिष्ठाः समज्ञास्थाः अहृदकृथा मूत्रमकृथा इत्येतेषु[३] निमित्तेषु य इदमकस्तस्मै नमस्तस्मै स्वाहेति तृतीयाꣳ । स यदि निषीदेद्यस्माद्भीषा न्यषद इत्येताꣳ हुत्वा तं मैत्रावरुणदण्डेनोत्थापयेदन्येनौदुम्बरेण वोर्ग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनवरुन्द्ध इति ब्राह्मणमुदस्य तिष्ठेत्युस्रमुदश्वेत्यश्वमुच्छागेति छागमुन्मेषेति मेषमुदश इति वशां । स उ चेत्प्राक् पर्यग्निकरणाम्रियेत याश्वमेधे प्रायश्चित्तिस्तां कृत्वाथान्यं[४] तद्दैवत्यं[५] तद्वर्णं[६] तद्वयसं[६] तद्रूपं तज्जातीयं पशुमालभेत । तस्योपाकरणादि सर्वमावर्तते निर्मन्थ्य सामिधेनीतच्छेषाघारसंप्रैषसंमार्गप्रवरप्रयाजवर्जमथ[७] यदि तज्जातीयं न विन्देताजावयो[८] गोअश्वा इत्यन्योन्यस्य प्रति-

१ ॰त्तिकां H U.

२ इति only in U (sec. m.)

३ Thus U (pr. m.) इत्येषु B, इत्येवमेतेषु Tr, इत्येवमेदेषु H.

४ Thus (and cp. XVIII. 11 : 355. 15.) Tr B; H U om. अथ।

५ तद्दे॰ Tr and the Viv.

६ तद्रूयसं तद्रूपं H U.

७ ॰सामिधेमित॰ Tr, ॰सामिधेनीस॰ H U.

८ Thus Tr, ॰ताजोमयो H U, ॰तांजावि B.

निधयो भवन्तीति[१]। तेषां छागस्य[२] मेषस्योपाकरणीयावलाभे[२] ऽन्यतममालभेत[२]। त्वाष्ट्रेण प्रचरणकल्पो व्याख्यातो[३]। ऽथास्य[३] शरीरमप्सु प्रवेशयति न वा उवेतन्मियम आशानां त्वा विश्वा आशा इति द्वाभ्याम्। ॥ ६ ॥

अथ यद्यङ्गहीनः पशू रूपतो वर्णतो वाग्नेयीमाशा-वैष्णवीमैन्द्रीं वायव्यां प्राजापत्यामिति च कृत्वा तमेवोपा-कुर्यादथ यदि वपामाह्रियमाणाꣳ श्येनो ऽपहरेच्छ्येद्वा[४] पात्र्याꣳ हिरण्यमन्तर्धाय[५] चतुर्गृहीतं[५] गृहीत्वाहवनीये जुहो-त्यन्वारब्धे यजमान उद्यन्त्सुपर्णो[६] न विभाति सर्वꣳ हिरण्य-कुक्षिः सप्तशिराः पुरस्तात्। सर्वेषु लोकेषु विभुः प्रविष्टो गातुमस्मिन्यज्ञे यजमानाय विन्द[७] स्वाहेत्यथैतस्यै[७] वपायै स्थाने यत्किंचिन्मेदोरूपमवशिष्टꣳ स्यात्तदुत्पाद्य[८] तेन प्रचरे-

१ भवंति B U H.

२ Partly conjectural reading; छागस्य मेषस्येदुपाकरणीयावुपाकर-णीयानमन्यतम॰ U, छागचेदुपाकरणीया उपाकरणीयानामन्यतम॰ H, छागं च मेषं चोपाकरणीयावावालभेदन्यतम॰ Tr, छागमसमेषचोपाकरणीयावलाभेन्यतम॰ B. The Viv. तेषां छागस्य मेषस्योपाकरणीयाविति।

३ U ins. after थास्य : षट्संयमभिविदर्शयति, H ins. before थास्य : (व्याख्यात)रेथास्य षट्चयमभिविदर्शयति (cp. IX. 19 : 296. 3).

४ Thus B Tr U; H corrupt.

५ Om. Tr.

६ उद्यंस्तु॰ H, उद्यन्सु॰ U Tr, उद्दुसु॰ B.

७ Thus Tr, विंदस्वा॰ B H U.

८ Thus B, ॰दुत्पाद्य Tr U H.

दं। अथ यद्येनां पुनर्विन्देत नैनामाद्रियेताथ यदि वपा हविरवदानं वा स्कन्देदा त्वा ददे यशसे वीर्याय चास्मास्वग्निया यूयं दधायेन्द्रियं पय इत्यादाय जुहोति यस्ते द्रप्सो यस्त उदर्षो दैव्यः केतुर्विश्वं भुवनमाविवेश। स नः पाह्यरिष्ट्यै स्वाहेत्यं। अथ यद्यसंस्थिते पशौ शकुनिस्त्वषाल उपविशेत्त्वषालं प्रक्षाल्य यूपं प्रोक्ष्य तथैवाज्येन जुहोत्यापवस्व वदस्व[1] वा[1] सोमपीतये गातुमस्मिन्यज्ञे यजमानाय विन्द[2] स्वाहेति[2]।
॥ ७ ॥ पञ्चमः ॥

अथातश्चातुर्मास्यान्तरालव्रतानि व्याख्यास्यामस्तंस्यैतद्व्रतं[3]। नानृतं वदति। न मांसमश्नाति। न स्त्रियमुपैति। नास्य[4] पल्पूलनेन वासः पल्पूलयन्त्यंमृन्मयपाय्यशूद्रोच्छिष्टो। स्वयं पादौ प्रक्षालयते[4]। न लवणमश्नाति। न कौशीधान्यमन्यत्र[5] तिलेभ्यो। नासन्द्याꣳ शयीत। न स्त्रियमुपेयात्कामम्ऋतौ जायामुपेयाद्यद्यजातपुत्रः स्यादुंभयोः कालयोर्मधुपूर्वं व्रत-

---

१ ? Thus U, वदस्व H, वदश्रुवा B, वदस्यश्रुवा Tr.

२ Thus Tr again. विंदत्स्वा॰ B U H, विदत्स्वा॰ Prāy. candr.

३ Thus B: व्याख्यास्यामो व्रतं चरेदिति तंस्यैतद्व्रतं Tr; after व्याख्यास्यामः H and U have a passage which seems to be interpolated (from XXI. 1.: 69. 2, 3): तान्यस्य (these two words only in H) यावज्जीवप्रयोगीत्येवं चातुर्मास्यानाम(न)न्तरस्मिन्नहनि प्रथमे त्वेव संवत्सरे व्रतं चरेदिति।

४...४ om. Tr.

५ Thus (and cp. II. 20: 67. 1) B. कोशी॰ H U Prāy. candr. कौशि॰ Tr.

मुपैति । मध्वश्नातीति ब्राह्मणं[1] । घृतमित्येवेदमुक्तं[1] भवति[1] । दैव्यं मध्विति । विज्ञायते ऽञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येनेति । नान्यस्योच्छिष्टं भुञ्जीत । नान्यस्यार्त्विज्यं कुर्वीत । नाश्नीत । नाभ्यञ्जीत । न श्राद्धं[2] भुञ्जीत । न लोमानि वापयीत[3] । न दतो धावते[4] । न नखानि निकृन्तते[4] । कामं पर्वसु[5] केशश्मश्रुलोमनखानि[6] वापयीत । चतुर्षुचतुर्षु मासेषु निवर्तयेतेति ब्राह्मणम् । संवत्सरादूर्ध्वं दार्शपौर्णमासिकमेव[7] व्रतमुपदिशन्ति तस्य चेद्वैश्वदेवस्य कालो[8] नातीयाद्यद्यतीयादग्नये[8] व्रतपतये पुरोडाशमष्टाकपालं निर्वपति[9] । सा प्रसिद्धेष्टिः संतिष्ठत आमावास्यकालादिति[10] व्याख्याताः । कालातिक्रमेष्वापदि[11] यजेत । ॥ ८ ॥ षष्ठः ॥

---

१ Thus Tr B; °वं वेदमुक्तं भवति घृतमित्येतद्दै H, ° ण चैवेदमुक्तं भवति घृतमित्येतद्दै U; on this passage cp. Rudr. on Āp. VIII. 4. 11.

२ श्राद्धानि Tr.

३ Thus U H, वापयते B, छिंदीत Tr.

४ Thus MSS., we expect the optat.

५ पर्वाणि Tr.

६ लोमनखानि om. Tr.

७ दार्शपूर्णमासिकं Tr.

८ Thus is the reading of U sec. m. U (pr. m.) B and Tr. om. the words यद्यतीयात् and B has कालोतीयाद् instead of कालोनाती° ।

९ वराहं दक्षिणां ददाति U ins. on the margin.

१० °स्यस्य कालादिति Tr.

११ Thus also the Vivaraṇa, काला चतिक्र° H. (rightly ?).

अथातो ऽध्वरदीक्षाप्रायश्चित्तानि व्याख्यास्यामो । दीक्षितश्चेदनृतं वदेदिमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्न इति चतस्रो वारुणीर्जपेत् । कृष्णाजिनाद्वावच्छिन्नो दण्डाद्वा देवाञ्जनमगन्यज्ञस्ततो मा यज्ञस्याशीरवतु । वर्धतां भूतिर्दध्ना[1] घृतेन मुञ्चतु यज्ञो यज्ञपतिमंहस इति जपेद् । मेध्यमनिष्टं वा दृष्ट्वा जपतीत्युक्तमेतद् । अभिवृष्टो ऽभिवृष्यमाणो वा[2] जपतीत्युक्तमेतद् । व्रतयित्वाप आचम्य जपति शिवाः पीता भवथ यूयमापो ऽस्माकं योनावुदरे सुशेवाः । इरावतीरनमीवा अनागसः स्वस्ति नो भवथ जीवस इति । छर्दयित्वा निष्ठीव्य वा जपति यद्वापि रसस्य मे निरष्ठविषमस्तृतः[3] । अग्निष्टोमः पृथिवी पुनरात्मन्दधातु स इति । रेत स्कन्नमनुमन्त्रयते यन्मे रेतः परीतोषात्तदर्पिथ[4] । अग्निहोत्रमिव[4] सोमेन तदहं पुनरादद इति । मूत्रं करिष्यन्पुरीषं वा पृथिव्या[5] लोष्टमादत्त इयं ते यज्ञिया तनूरिति । करोत्यपो मुञ्चामि न

---

१ दध्ना om. H.

२ om Tr.

३ निरष्ठविषम् B U H and the Prāy. candrikā, निरष्ठीविषम् Tr and a prayoga of the collection Burnell;—अस्तृतः or अस्तृत Tr B H and the same prayoga, अस्तृत B and the Prāy. candrikā.

४ परीतो° Tr B, परितो° U H Prāy. candrikā—°र्पिथ अग्नि° Tr, र्पिथा । अग्नि° prayoga Burnell, °र्पिथेग्नि° H, °र्पिथाग्नि° U, °र्पिताग्नि° B, cp. Āp. X. 13. 10.

५ पृथिव्यां Tr U.

प्रजामंहोमुचः स्वाहाकृताः पृथिवीमाविशतेति । लोष्टं प्रतिनिदधाति पृथिव्या संभवेति । बीभत्सा नाम[१] स्वापः[१] स्वाहाकृताः पृथिवीमाविशतेत्यश्रु[२] । कफस्या[३] नाम स्वापः स्वाहाकृताः पृथिवीमाविशतेति सूहानं[४] । तपस्या नाम स्वापः स्वाहाकृताः पृथिवीमाविशतेति स्वेदं । दुःस्वप्नं दृष्ट्वा जपत्यभिपर्यावर्तते[५] दुःस्वप्न पापस्वप्नादभूत्यै[६] । ब्रह्माहमन्तरं करवे न हि स्वप्नमुपपद्य[७] इति । स्वप्ने ऽन्नं भुक्त्वा जपति यदन्नमद्यते नक्तं न तत्प्रातः क्षुधो ऽवति । सर्वं तदस्मान्मा हिंसीन्न हि तद्दृशे दिवेति । लोहितमुत्पतितं दृष्ट्वा कण्डूय[८] वा जपति नमो रुद्रियाभ्यो ऽद्भ्यः स्वाहेति । न वर्षति धावेद्यदि धावेन्नमो रुद्राय[९] वास्तोष्पतय[९] इत्येतामृचं जपेन्नान्येन दीक्षितेन समेयाद्यदि समेयात्कया नश्चित्र आभुवदित्येतामृचं जपेद्व-

---

१ Thus (and cp. Āp. X. 14. 1) Tr, नामाप स्वः H U Viv. and Prāy. candrikā ; B om. this passage.

२ Thus the prayoga Burnell ; °श्री Tr, °श्रुपाते U ; H totally corrupt and B defective.

३ Thus Tr, Viv. and prayoga Burnell ; कफे निशेते कफस्या U.

४ Thus the prayoga Burnell, स्रोदं Tr, स्नेदं B and Viv, स्नस्या H.

५ Thus MSS., read with Āv. VII. 100 जपति पर्यावर्ते ।

६ The original reading of Baudh. is difficult to restore. °प्राउपभुज्यते B, °प्रोभुज्वे Tr, °प्रोपभुक्ते U Prāy. candr. °प्रोपभुक्ते H.

७ Thus B U Tr and Prāy. candr., °प्रद्य H.

८ Thus MSS.

९ वास्वे Tr.

यजनादन्यत्राभ्युदितो ऽभिनिम्रुक्तो वा सूर्यो मा देवो देवेभ्यः पात्विति जपेदितीत्वा[१] इमानि[१] सर्वास्वेवाध्वरदीक्षासु प्रायश्चित्तानि भवन्तीति[२] बौधायन । आवान्तरदीक्षायै विसर्गादिति शालीकिः । ॥ ९ ॥ सप्तमः ॥

अथातः सर्वयज्ञानां प्रायश्चित्तानि व्याख्यास्यामः । सर्वत्र स्कन्नच्छिन्नभिन्नभग्ननष्टदुष्टविपरीतहीनेषु[३] [४]हविःस्यन्दनास्रावितपतितस्फुटितेष्वद्विजश्वानबिडालकाकखरमृगपशुपक्षिसरीसृपादीनामन्यत्कीटानामृत्विजो[५] ऽग्नीनामन्तरागतानां[५] द्वादशगृहीतेन[५] स्रुचं पूरयित्वा दुर्गां[६] मनस्वतीं[६] महा-

---

१ Thus Tr (reading only ०त्वा), जपेदितीमानि B U H.

२ ह स्माह ins. H U.

३ Thus the Prayāscittapradīpa, and H and the Viv., the last two omitting, however, ०च्छिन्न०; स्कन्नेच्छिन्नेभिन्ने भग्ने० B U, स्कन्नेभिन्नेच्छिन्नेभग्न० Tr; ०हीन B.

४ हविस्संदना० B, हविस्संदता० H, हविस्स्यन्दना० Tr, हविर्विस्संदन० U.

५ One of the most difficult passages! स्फुतिवेष्वविर्द्विज० U, स्फुतितेषुद्विज B U, ०स्फुदितादिद्वज० Tr. The Viv. reads ष्वद्विज० (द्विजातिरिक्ताः शूद्रादयः) – श्वानवि (or वि)डाल० all, but the Viv. ०श्वानोविडाल० explaining श्वनः शकटम्; this points to ष्वद्विजश्वानोविडाल० – Before खर H U have शुक० – ०सरीसृपादिर् H U and the Viv., सरीसृपादि० Tr, सरीसृपादीनाम् B. – अन्यत्कीटानाम् the Viv., अन्यत्कीटो B, अन्यत्कीटानाम् H U. – ग्नीनामंतरागतानांद्वा० U (sec. m.), ग्नीनंतरागतानांद्वा० H U (pr. m.) ग्नीनामंतरागकेद्वा० B Tr, ग्नीनामंतरागकेद्वा० Viv.—Read perhaps instead of अन्तागतानाम्: अन्तरागमने। In the Gṛhyasūtra (IV, 8) this passage also is to be found equally corrupt.

६ Thus Tr, दुर्गामनस्वतौ B U H.

व्याहृतीस्तिस्रो जुहुयाज्जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः स्वाहेति[1] । कार्यविपर्यासे च[2] मन्त्रब्राह्मणमात्रं[3] दर्भधावर्हिःपरिधिविधृतिपवित्रहविःकपालस्रुक्स्रुवारणिकृष्णाजिनप्रणीताम्युद्वासनेन[4] यत्किंचित्कार्यविपर्यासः स्याद्ये चान्ये चाज्यस्थाल्याः स्रुवेणोपघातं प्रायश्चित्तानि जुहोति प्रजापतये स्वाहा हिरण्यगर्भाय स्वाहेत्यथ पितामहां जुहोति भृगूणां पतये स्वाहाङ्गिरसां तपसे स्वाहेत्यथ महाव्याहृतीर्जुहोति भूरग्नये च पृथिव्यै च महते च स्वाहा भुवो वायवे चान्तरिक्षाय च महते च स्वाहा सुवरादित्याय च दिवे च महते च स्वाहा भूर्भुवः सुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहेत्यथ व्याहृतीर्जुहोति भूः स्वाहा भुवः स्वाहा सुवः स्वाहा भूर्भुवः सुवः स्वाहेति । ॥ १० ॥

॥ अष्टमः ॥

११ मन्त्रहीने ऽतिरिक्ते वा दुरधीते दुरागते ।
अनागते ऽवषट्कारे[5] अतीते[6] वापि[7] यद्धुते[8] ॥

---

१ दुर्गा ins. B.

२ च found in H Tr and the Vivaraṇa.

३ Thus B, ॰मात्र Tr, ॰मंत्रभेदे च U, ॰मात्रोभेदे च H.

४ This whole passage is incomprehensible to me; हविः om. B K. – ॰कपालनामस्रु॰ H U – ॰वरणी॰ B K U – प्रणीतानामग्न्युद्वासनादि H U.

५ ॰ट्कृते H.

६ Thus Tr, ऽतीते H U, यतीते B.

७ चापि Tr, B.

८ ? ॰ते B Tr, ॰तं H U.

हविषः[१] स्यन्दनादग्नेर्होतुर्हीनस्वरेण[२] च।
अतिदाहे च हविषां यत्किंचित्पात्रभेदने॥
कपालनाशे भेदे च चतुष्पाद्यन्तरागते[३]।
प्रणाशे च पवित्रस्य[४] आज्यस्यैवात्रलोडने[४]॥
हविषां च विपर्यास ऋत्विक्ष्वप्रयतेषु च।
यज्ञप्रसारणीकाले[५] द्वैधीभावे समुत्थिते॥
भिन्दाहुती च होतव्ये व्याहृत्यः प्रणवादिकाः।
वारुण्यस्तन्तुमत्यश्चान्वग्निश्च[६] मनस्वती॥
महाव्याहृतयः सप्त प्राजापत्या तथैव च।
प्रसंधानाय यज्ञस्य[७] त्वेते[७] मन्त्राः प्रकीर्तिताः॥
अप्रायश्चित्तिको यज्ञो ह्यसुरैः संप्रभुज्यते।
असुरैर्भुक्तयज्ञस्तु[८] देवान्दोषेण[९] सऽश्नुयेत्॥

---

१ Thus Tr and the Viv. हविषाऽ U, हविषां B, हवि H.

२ होतृ॰ Viv.

३ Thus Tr B and the Viv., ॰ष्पादंतरागतौ U, ॰ष्पादांतरागतौ H.

४ Thus U, ॰त्रस्याज्य॰ Tr H, ॰त्रस्यचाज्य B.

५ ? Thus U H, प्रसारणा॰ Tr, प्रासारणा॰ B; प्रसारणिकाले यज्ञप्रसारिणिं (sic) यज्ञविस्तारः the Vivaraṇa.

६ Thus Tr H T U, ॰मत्यश्चाथान्व॰ B.

७ Thus Tr, यज्ञस्यैवे U (pr. m.) and H, स्येचेते U (sec. m.). स्यतत्ते B.

८ Thus H U B, ॰यज्ञस्य Tr.

९ Thus Tr B, यज्ञेन U, ज्ञयज्ञम H.

ऋत्विजो यजमानं[१] च[२] आयुषो[२] ब्रह्मवर्चसात्[३] ।
प्रच्यावयेद्दुरिष्टं तत्तस्माद्दोषान्प्रणाशयेदिति[४] ॥

॥ ११ ॥ नवमः ॥

अथातो ऽनुग्रहान्व्याख्यास्यामः[५] । सायंहोमं चोपोदयं[६] जुहुयात्प्रातर्होमं चोपास्तमयं[६] कालेन कालमनतिक्रम्य । कालो[७] दर्शपूर्णमासयोरग्निहोत्रस्य च न[८] स्कन्दते[८] न व्यथत इति[९] विज्ञायत । आ प्रातराहुतिकालात्सायमाहुतिकालो नातीयादा सायमाहुतिकालात्प्रातराहुतिकालो । ऽथ यदि सायं सायं दोषा वस्तोर्नमः[१०] स्वाहेत्याहुतिं हुत्वाग्निहोत्रं जुहुयाद्यदि प्रातः प्रातर्दोषा वस्तोर्नमः[१०] स्वाहेत्याहुतिं हुत्वाग्निहोत्रं जुहुयादथ यदि पूर्वस्यामाहुत्यां हुताया-

---

१ Thus B K U (pr. m.), °मानश्च Tr, मानं वा U (sec. m.).

२ आयुषो Tr.

३ °वर्चसः Tr.

४ Thus H U ; ततस्मा° B, तुतस्मा° Tr —The last words repeated in B Tr.

५ Thus Tr B and the Viv., नुकल्पान्व्या° H U.

६ Thus U H, वो° B Tr and the Viv.

७ Thus H ; काले U, कालेन B कालेन च Tr.

८ Thus H U, नस्कंदते B, स्कन्ने Tr ; °होत्रस्य च स्कंदनं व्यथते Viv., cp. the citation of Bhāradvāja in Rudradatta's comm. on Āp IX. 7. 3.

९ च ins, H U.

१० वस्तोर्नमो U and Prāy. candrikā.

माहवनीयो ऽनुगच्छेदग्निर्दारौ दारावग्निरिति वदञ्छकले[१] हिरण्यं निधायोत्तरामाहुतिं जुहुयात्कालातिक्रमेष्वापद्धोम[२] । आमावास्यस्य[२] कालात्पौर्णमासस्य कालो नातीयादा पौर्णमासादामावास्यस्यां व्रीह्याग्रयणस्य कालाच्छ्यामाकाग्रयणस्य कालो नातीयादा यवाग्रयणस्य[३] कालाद्व्रीह्याग्रयणस्या[३] श्यामाकाग्रयणाद्यवाग्रयणस्यां[४] वरुणप्रघासानां कालाद्वैश्वदेवस्य कालो नातीयादा साकमेधेभ्यो[५] वरुणप्रघासानामा शुनासीर्यात्साकमेधानामा वैश्वदेवाच्छुनासीर्यस्यां दक्षिणायनपशोः कालादुत्तरायणपशोः कालो नातीयादोत्तरायणपशोर्दक्षिणायनपशोरोत्तरवसन्तज्योतिष्टोमस्य[६] कालात्पूर्ववसन्तज्योतिष्टोमस्य[७] कालो नातीयात्संमस्तस्य संवत्सरस्या[८] निज्यासुत्या[८] । ऋषयो ह स्म तत्प्रयोयुगा[९] आसंस्ते ऽर्धमासायार्धमासायाग्निहोत्रमजुहवुः[१०] । प्रतिपदि सायं चतुर्दशगृहीतानि गृह्णाति ।

१ Thus U, वदच्छ° Tr, वदेछ° B H.

२ Thus Tr, °होममामा° U, होमामा° B U.

३ Thus Tr, °ग्रयणाद्व्रीह्याग्र° B H, °ग्रयणकालाद्व्रीह्याग्र° U.

४ श्यामाकाद्यवा° Tr.

५ Thus U, °धानां H B, °धानां कालाद्य° Tr.

६ Thus Tr, °पशोरुत्तरवसंत° B U.

७ Thus Tr, °त्पूर्ववसंतस्यज्यो° B, °त्पूर्ववसंतज्यो° U.

८ ? Thus Tr U, °त्सरस्य चानी° B; H om. this passage.

९ तत्प्रयोयुगा Tr, प्रयोगा H and the Viv. (pr. m.) तत्प्रयोगा B, प्रयोग U, प्रयोयुगा Viv. (sec. m.) which explains ऋतिशयेन प्रयोगविदः ।

१० Thus Tr B, र्धमासेर्धमासेग्नि° H U – °त्रमजुहवुः Tr, °त्रंजुहुयुः U H, °त्रंजुहुवुः B; on this passage cp. Hir. pi. sū. II. 9 : 56, 11.

सकृदुन्नयते हविरेका[1] समित्सकृद्धोमः[1] सकृदुपस्थानं । सकृत्पाणिनिमार्जनमेवं प्रातरथ षण्मासानकृते ऽग्निहोत्रे दर्शपूर्णमासाभ्यामनिष्ट्वाग्रयणेश्चातुर्मास्यैः पशुबन्धेन चाग्नये पथिकृते ऽग्नये तन्तुमते ऽग्नये वैश्वानरायाग्नये व्रतपतय इति[2] पुरोडाशान्निरुप्याग्निहोत्रं कृत्वा[3] दर्शपूर्णमासाभ्यामिष्ट्वाग्रयणेश्चातुर्मास्यैः[4] पशुबन्धेन चाथ संवत्सरमकृते ऽग्निहोत्रे दर्शपूर्णमासाभ्यामनिष्ट्वाग्रयणेश्चातुर्मास्यैः पशुबन्धेन चाग्नये पवमानायाग्नये पावकायाग्नये शुचये ऽग्नये पथिकृते ऽग्नये तन्तुमते ऽग्नये वैश्वानरायाग्नये व्रतपतय इति पुरोडाशान्निरुप्याग्निहोत्रं कृत्वा[3] दर्शपूर्णमासाभ्यामिष्ट्वाग्रयणेश्चातुर्मास्यैः पशुबन्धेन च । ॥ १२ ॥

अथ हविषामर्थे व्रीहियवौ । तयोरलाभे[5] प्रियङ्गवः कोद्रवोद्दारवरकवर्जं[6] श्यामाकनीवारवेणुयवास्तरसंपाककन्दमूलफलान्यापः[7] सक्तुमिति[8] । घृतमाज्यार्थे । गव्यमिति प्रत्यय-

१ Thus Tr B, एकाॱ समिधॱस॰ U H.

२ B U H put व्रतपतये before वैश्वानराय ।

३ Tr ins. अग्निहोत्रं जुहुयाद् ।

४ ॰र्मास्यैश्च Tr.

५ Thus B Tr, the Viv. and the Prāy. candr.; ॰रभावे H U.

६ ? Thus Tr H U, ॰वोद्दारक॰ B; ॰वोद्दारकमाषवर्जं the Prāy. dīpikā.

७ Uncertain reading; ॰संवादकंदमू॰ Tr, ॰संपाकंदमू॰ B U, ॰संपाकेमू॰ H. ॰सकंदमू॰ Prāy. pradipa.

८ Thus H U, सक्तमिति B ॰सक्तूमिति Tr.

स्तस्यालाभे माहिषमाजं वा घृतमाज्यार्थे प्रयुञ्जीत[१] । भोजनेष्वविरुद्धं मन्यन्त[२] एके । तयोरलाभे तैलं प्रतिनिधिस्तस्यालाभे जर्तिलतैलमतसीकुसुम्भसर्षपवार्क्षस्नेहा[३] इति[३] शिष्टप्रामाण्यादत ऊर्ध्वमलाभे यवपिष्टानि व्रीहिपिष्टानि श्यामाकपिष्टानि वाद्भिः संसृज्याज्यार्थे प्रयुञ्जीत । कुशाः स्तरणार्थे[४] । तेषामलाभे शरमयकुतपाश्ववालमुञ्जसुगन्धितेजनार्जुनादारदूर्वाश्यामाकाः[५] क्षीरवृक्षा इक्षव इत्येतेभ्यः । प्रस्तरबर्हिर्विधृतिपवित्रयूपरशनाशालाकपरिस्तरणान्तर्धानासनशयनस्तोत्रोपाकरणार्थाः कार्याः सर्वतृणेभ्यो वा शुष्कशुण्ठिनलबल्वजकृष्णतूलतृणवर्जं[६] । पालाशः खादिरो वेध्मस्तयोरलाभे याज्ञिकानां वा[७] वृक्षाणामन्यतमस्तेषामलाभे ऽरुकपित्थकोविदारशल्मलिश्लेष्मातकनीपनिम्बतिलकबाधकविभीतकराजवृ-

---

१ Thus B U, प्रयुंजते Tr., H. omits the passage.

२ B U ins. इति ।

३ Emended; ॰वार्क्षस्नेहाशिष्ट॰ Tr, ॰वार्क्षावास्नेहाच्छ्ष्ट॰ B, वार्क्षवास्नेहा इति शिष्ट॰ H U.

४ स्वास्तरणा॰ H U.

५ शरमय॰ Tr, शरमय्य॰ U, शरमय्यः H U – ॰र्जुनादार॰ Tr, ॰र्जुनादारा॰ B U, र्जुनशरा H.

६ Thus Tr (reading only शूर्ण instead of शुण्ठि); शुक॰ H U, ॰शीर्णविल्वकृष्ण॰ B; ॰शुण्डिनवल्मकृष्ण॰ H, ॰शुंडिनबल्वन॰ U. Sāyaṇa (citing in his bhāṣya on the darśapūrṇamāsa) gives शुंब instead of शुण्ठि॰ ।

७ Om. by Sāyaṇa in his citation.

च्छकरञ्जपलाण्डुवर्जं[१] । सर्ववनस्पतीनामिध्मो भवतीत्येके[२] । दक्षिणानां काले गौर्हिरण्यं वासस्तेषामलाभे फलानां मूलानां भक्ष्याणां[३] दद्यान्न त्वेव न यजेत ।

नित्यं[४] नित्येषु युक्तः स्यात्तथैवाजस्रिकेषु च ।
यस्य नित्यानि लुप्तानि[५] तथैवाजस्रिकाणि च ॥
विपर्यस्थो[६] न स[७] स्वर्गं गच्छते पतितो हि सः ।
तस्मान्मूलैः फलैर्वापि[८] मधुना तरसेन[९] वा[९] ।
नित्यं नित्यानि कुर्वीत न च नित्यनि लोपयेत् ॥

न च नित्यानि लोपयेदिति ॥ १३ ॥ दशमः ॥

॥ इत्यष्टाविंशः प्रश्नः ॥

---

१ Thus Tr and B (B reading, however, ०शल्मलौ० and ०पर्णार्जुन instead of ०पलाण्डु० : both have ०वार्भाणस० insead of ०बाधक०). Sāy. in a citation agrees with the above given reading, putting only करञ्ज between कपित्थ and कोविदार; U reads: नौपनिंबतिलकबाधकविभीतकराजवृक्षग्रावमल्लिरक्तं (sec. m. चरक करंजपिण्यकोविदारश्लेष्मातकपलांडु (sec. m. पर्णार्जुन) वर्जं; H: चौपनिंवबिल्वाकवार्भोणकवैभीतकराजवृक्षग्रावमकठंकपित्यंकरंजककोविंदारश्लेष्मातकपलांडुवर्जं ।

२ After एके the MSS. exc. Tr and the Viv. ins. यद्यदि ।

३ Thus H U, भक्ष्याणां B, भक्षणानां Tr.

४ Thus B U and Viv.; नित्या Tr, नित्यं H.

५ युक्तानि Tr.

६ Thus Tr B and Viv.; विपर्यस्था U H.

७ सः U च Tr.

८ Thus U H and Viv.; मूलफलैः Tr B.

९ Thus B and Viv. तरसापिवा Tr U H.

अथाभिदग्धानि[1] सदोहविर्धानानि समस्तदेवयजनमावृ-
तैव[2] क्रियेरन्ननावृता[3] वा[4] वसतीवरीः प्रथमं गृह्णीयादिति[5]
वाधूलकस्य मतमथेतरानानुपूर्वमित्यथ[6] यदि [7]भिन्नेषु कपा-
लेषु सर्वाणि[8] निपतेयुस्तत्र यावन्मूतं[9] पुरीषमादाय वसती-
वरीभिः संयुत्य[10] विस्राव्य प्रचरेत्तत्र प्रायश्चित्तं ग्रहाणामेकेन
जुहुयादाग्नीध्रीयविनाश आग्नेय्यर्चा[11] जुहुयादग्निर्मूर्धा दिव
इति । वैष्णव्या हविर्धाने[12] विष्णो त्वं नो अन्तम इत्याग्नेय्या[13]
स्रुच्यमग्निः सहस्रिण इति । वायव्यया वायव्येषु वायो शतं
हरीणामित्यैन्द्रिया[14] सदसीन्द्रं विश्वा अवीवृधन्निति । वैश्व-

---

१ अथाति॰ H U and the Vivaraṇa.

२ Thus Tr H U and Prāy. candrikā, समस्तंदेव॰ B.

३ Thus B and the Viv., क्रियेरन्नावृता Tr H U, cp. Rudradatta on Āp. XIV. 25. 2.

४ Om. T B, given by U H and the Vivaraṇa.

५ Thus Tr B, गृह्णीरन्निति H U.

६ Thus B, ॰तरानानुपूर्वमित्यथ Tr, ॰तरानानुपूर्व्यं भवत्यथ U, ॰तराण्यनुपूर्वं भवंत्यथ H.

७ Om. H.

८ कपालानि यत्र ins. B, यत्र ins. Tr.

९ यावन्मूतं U and Viv., यावन्मतं B H, यावन्मूतं Tr.

१० Thus U, ॰युत्य H B, ॰हृत्य Tr.

११ ॰ग्नेय्या B U H.

१२ ॰र्धानं B Tr.

१३ The passage अग्नेय्या...हरीणामिति found in H U only.

१४ ॰त्यैंद्रीया H B ॰त्यैंद्रा Tr, त्यैंद्रा U.

देव्या प्राग्वꣳग्ने विश्वे देवाः शृणुतेमꣳ हवं म इति । सर्वेषु मिन्द्राहुती जुहुयाद्व्याहृतीश्चापि वेष्टिं निर्वपेदगारदहने[१] क्षामवान्[२] सर्वविनाशे तन्तुमती[३] । दग्धेषु[४] सोमेषु[४] वा नष्टेषु वा सोमानामुपघातापहारेषु[५] वा यथालाभमꣳशून्गृहीत्वा वसतीवरीभिः[६] संयुत्याभिषुत्य[६] प्रचरेत्सर्वविनाश ओषधीभिरभिषुत्य प्रचरेत्तत्कृत्वा[७] पुनर्यजेतेति श्रुतिरेवमेव कुर्यात्सा[८] प्रायश्चित्तिरिति । ॥ १ ॥ प्रथमः ॥

अथ होत्रकाणामन्योऽन्यस्य मैत्रावरुणश्चोदयेदपि[९] वान्योऽन्यस्य याज्यापुरोऽनुवाक्याभ्यां[१०] यजेत[१०] तस्य प्रायश्चित्तं । ब्राह्मण एकहोतेत्यस्यानुवाकस्य प्रथमेन होतुर्जुहुयाद्द्वितीयेन मैत्रावरुणस्य तृतीयेन ब्राह्मणाच्छꣳसिनश्चतुर्थेन पोतुः पञ्चमेन नेष्टुः षष्ठेनाच्छावाकस्य सप्तमेनाग्नीध्रस्याध्वर्युः प्रधानदेवतामनुच्चारयित्वा योन्यामुच्चारयेद्यद्दो देवा अतिपादयानीत्येतया स्रुवाहुतिं जुहुयाद्दशात्मकेनाष्टमेन नवमेन पूर्वोक्तं

---

१ Thus Tr U Viv., ॰दाहे B H

२ Thus all the MSS. and the Vivaraṇa.

३ Thus Tr and the Viv , मती B H U.

४ दहनेषु Tr.

५ Thus Tr B; योपघातापचारेषु U, वेचघातापचारेषु H.

६ ॰वरीभिःसंयुत्य U, ॰वरी: संपूत्य H, Tr B om . these three words.

७ तत् om. H U.

८ सा om. U Tr.

९ Thus Tr ॰चोदयत्यपिवा B U H and the Viv. : H om. अपि वा ।

१० Thus Tr B and the Viv., ॰वाक्याभ्यामयजेत H, ॰वाक्या भवति U.

प्रायश्चित्तं कुर्याद्। उक्थ्यपर्यायेषु[१] यथाक्रमेण जुहुयाद्दशमेन षोडशिराचिपर्यायेभ्यो[२] राथंतराय संधये। तथा शिपिविष्टस्तोत्रे वाजपेये। तथातिरिक्तस्तोत्रेष्विति[३] यथाचोदितमन्यो यजेत्तत्प्रथमो[४] यजेज्जपेद्वा स्वयं चोदितः स्वयमेव यजेद्द्वितीय एव[५] प्रायश्चित्तं भवेत्सोमे ऽन्यत्रैवं कुर्याद्धोतान्येन यजेदन्येनैव[६] मैत्रावरुणो वा पूर्वोक्तं प्रायश्चित्तं कुर्यात्। तथा याज्यापुरोऽनुवाक्यास्वन्यथान्यत्प्रायश्चित्तं[७] भवेद्। यथाश्वमेधस्यान्नहोमेष्वारण्यानां पशूनाꣳ स्रुवाहुत्या ऊनातिरिक्तपुनरुक्तव्याघातेषु[८] मिन्द्राहुती जुहुयात्। तथेष्टकोपधाने। ऽथ[९] देवसुवाꣳ हविषामन्यद्बीजमन्यदैवतस्य[१०] कुर्यात्तदुत्सृज्य पुनरुत्पाद्य यजेद्। इतिशिष्टꣳ सह यजेज्जपेद्वा। पूर्वोक्तं प्रायश्चित्तं कुर्यादिति। ॥ २ ॥ द्वितीयः ॥

---

१ ॰क्थ्य॰ H U.

२ Thus B H, षोडशि निराचि॰ Tr U.

३ इति in Tr only.

४ Thus Tr U, यजेतत्प्र॰ B, यजेनप्र॰ H.

५ एवं B only.

६ Thus B U, यजेतान्यं दैवतं Tr (H om.).

७ ? Thus Tr, ॰क्यास्वन्यथान्यतप्रा॰ B, ॰क्यास्वथान्यथान्यच प्रा॰ H, ॰क्यास्वथान्यच प्रा॰ U.

८ ? Thus Tr, ऊनातिरिक्तेषु पुनरुक्तव्याघातेषु U, ऊनातिरिक्तेषु H, न्यूनातिरिक्तेषु B.

९ थ om. H U.

१० ? ॰षामन्यंबीजमन्यंदैव॰ B, ॰षामन्यं बीजमन्यदैव॰ Tr H, ॰षामन्यदन्यदै॰ U.

अथ वितते यज्ञकर्मणि प्रायश्चित्तानि व्याख्यास्यामस्त्रौषधं पयः पशुः सोम आज्यमित्येतेषु न्यूनेषु वा नष्टेषु वापहृतेषु[1] वा[1] पुनरुत्पाद्य गृह्णीयाद्यच्च स्मरेत्प्राक् स्विष्टकृत उत्पादनं भवति । स्विष्टकृत ऊर्ध्वꣳ स्मरेत्तत्सꣳस्थाप्यैतेनैव[2] पुनर्यजेत्सह यजेद्वाथ यदि निरुप्य स्मरेदन्यं[3] दैवतमसुष्मै त्वेति प्रतिविभज्याभिमृश्य[4] सर्वं जुहुयादसुष्मै स्वाहेति । यच्च[5] स्मरेत्तच्चैवमेव कुर्यादासादनादूर्ध्वं[6] यद्यासाद्य स्मरेदन्वायात्य स्थानेषु जुहुयादन्यदा[7] पूर्वोक्तं प्रायश्चित्तं कुर्यादन्यासु देवतास्विष्टासु[8] नष्टेषु दुष्टेषु वा[8] दोषवति[9] तन्त्रे प्रधानमावर्तयेत्सर्वेष्टिरशेषतस्तस्य[10] कः कर्मण उपक्रमो भवतीति । भागिनो दैवतस्य शूर्पादानप्रभृति कर्म कृत्वा श्रपयित्वासाद्य स्वस्थाने[11]

---

१ These two words in Tr only.

२ तत् om. B H.

३ ॰न्यद्दैवतं H.

४ तदानीमेव ins. U.

५ वा ins. B U H.

६ जुहुयात् instead of कुर्यात् Tr.

७ अन्यत् in U only. Is it to be cancelled ?

८ Thus B U, ॰ष्टासु नेष्टदुष्टेषु वा H, ॰सुंसृष्टेषु वा Tr.

९ Thus B U, दोषवति Tr, – षवति B.

१० H आवर्तये instead of आवर्तयेत्, ॰सर्वेष्टिरशेषेतस्य Tr. ॰सर्वेष्विष्टिरशेषतस्तस्य B U, ॰सर्वेमिरशेषतस्तस्य H; सर्वेष्टिरशेषतः gives the Vivarana.

११ स्व om Tr.

प्रचरेत्तत्र प्रायश्चित्तं मिन्दाहुती जुहुयाद्व्याहृतीश्चैवं[1] पश्वावुपाकरणप्रभृत्या[2] स्विष्टकृतः[2] पूर्वोक्तं[3] प्रायश्चित्तं[3] कुर्यादथ[3] यदि प्रातरनुवाकमनुपाकृतमादित्यो ऽभ्युदियात्कथं तत्र प्रायश्चित्तं भवतीत्युषाः केतुना जुषतां यज्ञं देवेभिरन्वितम्। देवेभ्यो मधुमत्तमꣳ स्वाहेति मिन्दाहुती व्याहृतीश्च कृत्वोपाकुर्यादथ यदि प्रातरनुवाके ग्रस्यमान आदित्यो ऽभ्युदियादुद्वयं तमसस्पर्युदु त्यं चित्रमित्येताभिः स्रुवाहुतीर्जुहुयादथ यदि सोमो नाविः स्यान्नवोनवो भवति जायमानो यमादित्या अꣳशुमाप्याययन्तीत्येताभ्याꣳ[4] स्रुवाहुती[4] जुहुयाद्यदि[4] सूर्याचन्द्रमसोर्ग्रहणं[5] विद्यत एतदेव ॥ ३ ॥

अथ यदि ग्रहान्गृहीष्यमाणो भागिनीं देवतामगृहीत्वा योन्यां गृह्णीयात्तथामुष्मै[6] स्वाहेति तदानीमेव सर्वं जुहुयाद्भागिनीं पुनर्गृहीत्वा मिन्दाहुती जुहुयादपि वा ग्रहाणामेकेन जुहुयात्सर्वान्वाचस्पते विधे नामन्नित्येवमादीन्ग्रहान्होत्रकाणां[7] ग्रहेषु वा चमसेषु वा हविर्दोषोक्तदोषो[8] भवे-

१ °व H U.

२ Thus Tr, °प्रभृतितयास्विष्ट° H U B.

३ Thus Tr, पूर्वोक्तं प्रायश्चित्तमथ B, °क्तमथ H U.

४ एताभ्यां स्रुवाहुतीर (sic) and यदि only in Tr.

५ सूर्यचंद्र° B U H.

६ °यादथा° H U.

७ Thus Tr, होत्रणां or होतॄणां B U H.

८ Before भवेत् H U ins. वा।

	Rs.	As.
*Dasa Rupa (Text), Fasc. 2–3 @ -/10/- each	1	4
Dharmabindu, Fasc. 1 @ -/10/- each	0	10
Dictionary of the Kashmiri Language, Part I	15	0
Gadadhara Paddhati Kālasāra, Vol. I, Fasc. 1–7 @ -/10/- each	4	6
Ditto Ācārasāra, Vol. II, Fasc. 1–4	3	2
Gobhilīya Grihya Sūtra, Vol. I	3	2
Ditto Vol. II, Fasc. 2–3 @ 1/4/- each	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Haralata	1	14
*Institutes of Vishnu (Text), Fasc. 2 @ -/10/- each	0	10
Kāla Viveka, Fasc. 1–7 @-/10/- each	4	6
Karmapradiph, Fasc. 1	1	4
Kātantra, Fasc. 1–6 @-/12/-each	4	8
*Katha Sarit Sagara (English), Fasc. 4–14 @ 1/- each	11	0
Kavi Kalpa Lata, Fasc. 1	0	10
Kavindravacana Samuccayah	3	8
Kiranavali, Fasc, 1–3 @ -/10/-	1	14
Krityaratnakar, Fasc. 1, @ -/10/-	0	10
Kurma Purana, Fasc. 1–9 @ -/10/- each	5	10
*Lalita Vistara (English), Fasc. 1–3 @ 1/- each	3	0
Madana Pārijāta, Fasc. 1–11 @ -/10/- each	6	14
Mahā-bhāsya-pradipoddyota, Vol. I, Fasc. 1–9; Vol. II, Fasc. 1–12; Vol. III, Fasc. 1–10 @ -/10/- each	19	6
Ditto Vol. IV, Fasc. 1–4 @ 1/4/- each	5	0
Maitra, or Maitrayaniya Upanishad, Fasc. 1–2	1	4
Manutīkā Sangraha, Fasc. 1–3 @ -/10/- each	1	14
Mārkaṇdeya Purana (English), Fasc. 1–9 @ 1/- each	9	0
*Markaṇdeya Purana (Text), Fasc. 4–7 @ -/10/- each	2	8
*Mimansa Darcana (Text), Fasc. 9, 11–17 @ -/10/- each	5	0
*Mirror of Composition (English), Fasc. 4	2	0
Mugdhabodha Vyakarana, Vol. I, Fasc. 1–7 @ -/10/- each	4	6
Nirukta (2nd edition), Vol. I, Fasc. 1–2 @ 1/4/-	2	8
*Nirukta (old edition), Vol. IV, Fasc. 1–8 @ -/10/- each	5	0
Nityācārapaddhati, Fasc. 1–7 @ -/10/- each	4	6
Nityācārapradīpa, Vol. I, Fasc. 1–8, Vol. II, Fasc. 1–4 @ -/10/- each	7	8
Nyaya Vartika Tatparya Parisudhi, Fasc. 1–7 @ -/10/- each	4	6
*Nyayavartika (Text), Fasc. 2–7 @ -/10/- each	3	12
Nyayasarah	2	0
Padumāwati, Fasc. 1–6 @ 2/- each	12	0
*Parāçara Smriti, Vol. I, Fasc. 2–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ -/10/- each	11	14
Parāçara, Institutes of (English) @ 1/- each	1	0
*Paricista Pārvan (Text), Fasc. 5 @ -/10/- each	0	10
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi (English), Fasc. 1-3 @ 1/4/- each	3	12
Prākrita-Paingalam, Fasc. 1–7 @ -/10/- each	4	6
Prithviraja Vijaya, Fasc. 1–2	1	4
Rasarnavam, Fasc. 1–3	3	12
Ravisiddhanta Manjari, Fasc. 1	0	10
*Saddarśana-Samuccaya, Fasc. 2–3 @ -/10/- each	1	4
Sadukti-karna-mrita, Fasc. 1–2 @ -/10/- each	1	4
Samaraicca Kaha, Fasc. 1–7 @ -/10/- each	4	6
*Samaveda Sanhita, Vol. I, Fasc. 1–4, 6–10; Vol. 2, Fasc. 2–6; Vol. 3, Fasc. 1–7; Vol. 4, Fasc. 1–6; Vol. 5, Fasc. 1–8 @ -/10/- each	21	4
*Sankara Vijaya (Text), Fasc. 2–3 @ -/10/- each	1	4
*Sankhya Aphorisms of Kapila (English), Fasc. 2	1	0
*Sankhya Pravachana Bhashya, Fasc. 2	0	10
Sāṇkhya Sūtra Vṛtti, Fasc. 1–4 @ -/10/- each	2	8
Ditto (English), Fasc. 1–3 @ 1/- each	3	0
Siva Parinahya, Fasc. 1–3 @ /10/ each	1	14
Six Buddhist Nyaya Tracts	0	10
Smriti Prakasha, Fasc. 1	0	10
Srāddha Kriyā Kaumudī, Fasc. 1–6 @ -/10/- each	3	12
Srauta Sutra of Latyayana (Text), Fasc. 1–9 @ -/10/- each	5	10
Sri Surisarvasvam, Fasc. 1–3 @ -/10/- each	1	14
Suçruta Samhitā (English), Fasc. 1 @ 1/- each	1	0
Suddhi Kaumudī, Fasc. 1–4 @ -/10/- each	2	8
Sundaranandam Kavyam	1	0
*Suryya Siddhanta, Fasc. 2 @ 1/4/-	1	4
Syainika Sastra	1	0
*Taittereya Samhita (Text), Fasc. 17–45 @ -/10/- each	18	2
*Taittiriya Aranyaka of Black Yajur Veda (Text), Fasc. 5-11 @ -/10/- each	4	6
*Taittiriya Brahmana (Text), Fasc. 3–24 @ -/10/- each	13	12

	Rs.	As.
*Taittiriya Pratisakhya (Text), Fasc. 2–3 @ -/10/- each	1	4
*Tandya Brahmana (Text), Fasc. 13–18 @ -/10/- each	3	12
Tantra Vārtika (English), Fasc. 1–15 @ 1/4/-	18	12
*Tattva Cintāmaṇi, Vol. II, Fasc. 7–10; Vol. III, Fasc. 1–2; Vol. IV, Fasc. 1; Vol. V, Fasc. 1–5; Part IV, Vol. II, Fasc. 1–12 @ -/10/- each	14	6
Tattva Cintamani Didhiti Prakas, Fasc. 1–6 @ -/10/- each ..	3	12
Tattva Cintamani Didhiti Vivriti, Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1 @ -/10/- each	7	8
*Tattvarthadhigama Sutram, Fasc. 2–3 @ -/10/- each	1	4
Tirthacintamoni, Fasc. 1–4 @ -/10/- each	2	8
Trikāṇḍa-Maṇḍanam, Fasc. 1–3 @ -/10/-	1	14
Tul'si Satsai, Fasc. 1–5 @ -/10/-	3	2
Upamita-bhava-prapañca-kathā, Fasc. 1–14 @ -/10/- each.. ..	8	12
*Uttara Naishadha (Text), Fasc. 6–12 @ -/10/- each	4	6
Uvāsagadasāo (Text and English), Fasc. 1–6 @ 1/-	6	0
Vajjalaggam, Fasc. 1	0	10
Vallāla Carita, Fasc. 1 @ -/10/-	0	10
*Varaha Purana (Text), Fasc. 2–14 @ -/10/- each	8	2
Varṣa Kriyā Kaumudi, Fasc. 1–6 @ -/10/-	3	12
Vayu Purana (Text), Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–7 @ -/10/- each	8	2
*Vedanta Sutras (Text), Fasc. 7–13 @ -/10/- each	4	6
Vidhāna Pārijāta, Fasc. 1–8; Vol. II, Fasc. 1 @ -/10/-	5	10
Ditto Vol. II, Fasc. 2–5 @ 1/4/-	5	0
Ditto Vol. III, Fasc. 1	0	10
Vishrahitam, Fasc. 1	0	10
Vivādaratnākara, Fasc. 1-7 @ -/10/- each	4	6
Vrihat Svayambhū Purāṇa, Fasc. 1–6 @ -/10/-	3	12
*Vrihannaradiya Purana (Text), Fasc. 3–6 @ -/10/- each	2	8
Yogaśastra, Fasc. 1–5	5	10
*Yoga Sutra of Patanjali (Text and English), Fasc. 3–4 (Fasc. 3, Re. 1/-, Fasc. 4, Rs. 2/-)	3	0

Rajasthani Series.

	Rs.	As.
A Descriptive Catalogue of Bardic and Historical Manuscripts.		
Sect. i: Prose Chronicles. Part i: Jodhpur State. Fasc. 1 ..	1	0
Sect. i: Prose Chronicles. Part ii: Bikaner State. Fasc. 1 ..	1	0
Sect. ii: Bardic Poetry. Part i: Bikaner State. Fasc. 1 ..	1	0
Vacanikā Rāthòṛa Ratana Siṅghajī rī Mahesadāsòta rī Khiṛiyā Jagā rī kahi. Part i: Ḍiṅgaḷa Text with Notes and Glossary ..	1	8
Veli Krisana Rukamaṇī rī Rāthòṛa rāja Prithī Rāja rī kahī. Part i: Ḍiṅgaḷa Text with Notes and Glossary	1	8
Bardic and Historical Survey of Rajputana, Chanda rāu Jèta Sī rò ..	1	8

Tibetan Series.

	Rs.	As.
Amarakosah, Fasc. 1–2	4	0
Amartika Kamdhenuh	1	0
Bauddhastotrasangraha, Vol. I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1–4 @ 1/- each ..	4	0
Nyayabindu (A Bilingual Index)	1	0
Nyayabindu of Dharmakirti, Fasc. 1–2	2	0
Pag-Sam Śhi Tin, Fasc. 1–4 @ 1/- each	4	0
Prajna Pradipah .. .. .. — ..	1	0
Rtogs brjod dpag hkhri Śiṅ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, Fasc. 1–13; Vol. II, Fasc. 1–11 @ 1/- each..	24	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–6 @ 1/- each	14	0
Timed-Kun-Den	1	0
Minor Tibetan Texts. The Song of the Eastern Snow Mountain ..	1	0

	Rs.	As.
Notices of Sanskrit Manuscripts, Fasc. 1–34 @ 1/- each	34	0
Ditto ditto (Palm-leaf and selected paper MSS.) @ 3/- each ..	6	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ..	5	0
Report on the Search of Sanskrit MSS., 1895-1900, 1901-1905, and 1906-1911 @ -/8/- each	1	8
Catalogue of the Scientific Periodicals in Calcutta Libraries ..	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

1-9-21.

Books are supplied by V.P.P.

PK
3255
B3
1907
v.3
pt.4

Baudhayana
Srautasutram

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY